आरण्यकम् सितम्बर 2009 ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

संस्कृतप्रसारपरिषद्
आरा (विहारः)

षोडश वर्षम्, द्वितीयोऽङ्कः

सितम्बर 2009

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन/कोरबैंकिंद्वारा प्रेषणीयम्।
   (क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, रामेश्वर-लीलासदनम्, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
   (ख) बैंक ड्राफ्ट '**संस्कृतप्रसारपरिषद्**' इति नाम्ना '**आरा**' (**विहारः**) नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
   (ग) कोरबैंकिं (Core-Banking) द्वारा 'संस्कृतप्रसारपरिषद्'-नाम्ना Indian Bank, Ara खाता सं.552203784 इत्यत्र राशिः प्रेषणीयः।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्


वर्षाङ्कौ - षोडश वर्षम्, द्वितीयोऽङ्कः

आश्विनः, वि.सं.२०६६

सितम्बर, २००९

प्रतिवर्षं प्रकाशनकालः
चैत्रः, आश्विनः-विक्रमाब्दः
मार्च, सितम्बर

प्रत्यङ्कम् - २५ रूप्यकाणि　　वार्षिकं शुल्कं ५० रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि

परामर्शदात्री समितिः

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो. गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थान, मौलाबाग, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

## सम्पादकीयम्

कालो गच्छति। महाकालः साक्षिभावमादाय पश्यति। श्रीभगवान् अर्जुनस्य अन्तर्गतं पाण्डित्यम् उद्बोध्योपदिशति–**गतासूनगतासूँश्च नानुशोचन्ति पण्डिताः** इति। अर्थात् ये गताः प्रस्थिता वा ते नानुशोच्याः तथा च अगतासवो विद्यमाना वा तेऽपि नानुचिन्तनीयाः, यतो हि यथाकालं सर्वैरपि प्राणिजातैः प्रस्थातव्यमेव। एष विचारस्तु परिणतबुद्धीनां पण्डितानां कृते इति उद्धृतांशाशयः। किन्तु ये सामान्याः जनाः तेषां कृते विद्यमानविषयिणी चिन्ता न करणीयेति वचनानुपालनं न तथा सुकरं भवति। तेषां विषये 'स्थितस्य गतिश्चिन्तनीये'ति शास्त्रव्यवहारवतां सामान्याभिमतम् अतीवोपयोगि स्यादेव।

पाणिनीयव्याकरणे 'दन्तानां राजा = दन्तराज' इति वैयाकरणविधिमनुसृत्य प्रयोक्तव्यतां परित्यज्य 'राजदन्तः' इति वास्तविकप्रयोगस्य प्रामाण्यं पुरस्कृत्य 'राजदन्तादिषु परम्' (पा.२.२.३१) इति सूत्रविशेषो व्यरचि महर्षिपाणिनिना। तत्रेदं कारणं यत् सत्स्वपि सिद्धान्तेषु तद्व्यतिरिक्तशिष्टप्रयोगस्य प्रामाण्यम् अवश्यं स्वीकार्यमिति। अतः सर्वथा नियमप्रणयापेक्षया प्रयोगप्रणयो विजयते। 'गतस्य स्थितिश्चिन्तनीया' इत्यपेक्षया 'स्थितस्य गतिश्चिन्तनीया' इति राद्धान्त आद्रियते।

भारतीयदर्शनं गतस्य स्थितिमनुचिन्त्य बहुविधं चिन्तनं प्राचीनकालादेव विदधदस्ति। मृत्योः परम् आत्मनः केन रूपेण विद्यमानता उत मृत्युरेव अन्तिमा परिणतिरिति मतमाश्रित्य सम्पूर्णा उपनिषद्भारती विद्योतते। तृतीयवररूपेण नचिकेता अमुमेव प्रश्नं यमस्य पुरत उपस्थापयति–

**येयं प्रेते विचिकित्सा मनुष्येऽ–**
**स्तीत्येके नायमस्तीति चैके।**
**एतद्विद्यामनुशिष्टस्त्वयाहं**
**वराणामेष वरस्तृतीयः।।** (कठोप. १.१.२०)

मृत्योर्वास्तविकीं स्थितिं विज्ञाय तज्ज्ञानबलेन तं (मृत्युं) विजेतुं भारतीयमनीषाया अयं ज्ञानजैत्ररथः सुतराम् अग्रेसरः परिलक्ष्यत एव। अत एव भारतीयानाम् आराध्यो देवाधिदेवो महादेवः 'मृत्युञ्जय' इति पदवीमाधत्ते। अतोऽत्र **अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अव्यक्तनिधनान्येव......** (गीता २.२८) इत्युक्त्या केवलं व्यक्तमध्यं शरीरमादाय तदन्वितं जीवनं न प्रवर्तते, अपितु अव्यक्तमपि तत्त्वं विजिज्ञासवश्चेतसा मनसा वपुषा च तत्सन्निहितचिन्तनधियो दृश्यन्ते, व्यक्ताव्यक्तरूपं पूर्णं सत्यमूहितुं प्रयतन्त इति भावः। तद्यथा–

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**

**तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।** (ईशोप. १५)

एतेन गतस्य गमनशीलस्य वा जीवनस्य स्थितिं विज्ञाय **विद्ययाऽमृतमश्नुते** (ईशोप. ११) इति वचनात् अमृतत्वावाप्तिः मर्त्यानां परमं लक्ष्यमिति आर्यचिन्तनपरम्परायां मौलिकं विशिष्टं च स्वरूपं प्रभवतितराम्।

किन्तु, कथितैषा धीः केवलम् अविज्ञातमदृष्टमव्यक्तं वा विमर्ष्टुं प्रवर्तत इति न, एषा वर्तमानजीवनं कदापि नोपेक्षत एव। अत ईशावास्योपनिषद आदावेव परमं सर्वव्यापि तत्त्वमभिधाय त्यागसहितं जीवनं जीवितुमुपदिशन्ति मन्त्रद्रष्टारः, तद्यथा–

**ईशावास्यमिदं सर्वं यत् किंच जगत्यां जगत्।**

**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्।।** (ईशोप. १)

तथा च जीवने कर्मणः प्रामुख्यमुद्घोषयता मन्त्रेण तत्रैवोक्तम्–

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।** (ईशोप. २)

अत एव नचिकेताः यमेन प्रतिज्ञातेषु त्रिषु वरेषु प्रथमवररूपेण आत्मतत्त्व-विज्ञानं न प्रार्थयते, अपितु स्वस्य पितुः मानसिकीं शान्तिं मन्युराहित्यं च कामयत एव–

**शान्तसंकल्पः सुमना यथा स्याद्**

**वीतमन्युर्गौतमो माभि मृत्यो।** (कठोप. १.१.१०)

अखिलां गीतां तद्गतं तत्त्वचिन्तनं च श्रुत्वा अर्जुनः अन्ततो युयुत्सुरेव भवति, न तु मुमुक्षुः। शौनकादयः सहस्राणि ऋषयो लोकजीवने क्लेशाक्रान्तानां



जीवानां कष्टनिवारणपूर्वकं सुखप्राप्तये उपायविषयमेव सूतं पप्रच्छुः, न तु आत्मनः सौख्यम् अथवा जीवानां केवलं परलोकगतकल्याणसिद्धिम्, तद्यथा–

**प्रायेणाल्पायुषः सभ्य कलावस्मिन् युगे जनाः।**

**मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः।।**

**भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः।**(भागवतपुराणम् १.१.१०)

एवमेव कर्मसन्न्यासिनोऽपि ऋषयः लोकानाम् उचितकर्मसु प्रवृत्तिमेव विमृशन्त आसन् न तु कर्मनिवृत्तये उत्प्रेरकाः। अतः स्वधिया गतस्य अदृष्टा स्थितिर्यद्यपि वेदितव्या तथापि तदपेक्षया आदौ 'स्थितस्य गतिश्चिन्तनीये'ति व्यावहारिकं सिद्धान्तमाश्रित्य लोका यथा प्रवर्तेरन् तथा मतिः सर्वेषु शास्त्रेषु दर्शनेषु काव्येतिहासादिषु च दृश्यत एव। एतेन कारणेन न केवलं प्रत्यक्षमेव प्रमाणमामनन्ति वैदिका दार्शनिकाः अपितु अनुमानेन पर्वतगतमग्निमूहन्ते, उपमानेन गवयज्ञानं साधयन्ति, आप्तवाक्येन च परोक्षसत्यम् अनुभूततत्त्वं वा पोषयन्त्यपि। अर्थात् यत्र कुत्रापि यस्य कस्यापि स्थितिः, तस्य गतिर्ज्ञानं वा अवश्यं प्राप्येत, न तु तस्य कृते उपेक्षाबुद्धिः प्रवर्ततेति भारतीया भावस्वरूपा शेमुषी संसिद्धैव। अतो ये केचन भारतीयचिन्तनं पलायनपरं परलोकादिविषयं वा वदन्ति तेऽनेन विवेकेन सुतरां प्रत्यूहितुं शक्यन्ते।

'आरण्यका'ख्यं शोधपत्रमिदं संस्कृतवाङ्मये तत्तच्छास्त्रादिस्थितेः गतिं ज्ञानं वा उक्तरीत्या समीक्षितुमीहते। अङ्केऽस्मिन् पण्डिततारानाथतर्कवाचस्पतिना विरचित-मद्यावधि विद्वद्भिः सम्यक्तया अनीक्षितं शब्दार्थरत्नाख्यमतीव मौलिकं पुस्तकं तद्गतरहस्यान्वाख्यानपूर्वकं तद्रचयितृवैदुषीप्रथनपुरस्सरं च समीक्षितं विद्यते, तथैव महाकविरत्नाकरविरचितं 'हरविजयमहाकाव्य'मपि तद्गतरसपरिपाकसमुल्लेखेन सह समीक्ष्यते। भक्तेरुद्गमस्थलं वेदेषूहितुमत्र लेखविशेषे प्रयत्यते। तथा च व्याकरणे क्तप्रत्ययस्य सैद्धान्तिकानि व्यावहारिकाणि चाखिलानि स्वरूपाणि विविच्यन्ते। श्रीचैतन्यदेवस्य गौड़ीयवैष्णवपरम्परायां नामसंकीर्तनस्य महत्त्वं यथा विविच्यते तथा तस्य सामाजिकः प्रभावोऽपि संदर्श्यते। अपि च अद्यतने काले उपनिषच्छिक्षायाः आवश्यकता लेखविशेषे उपस्थाप्यते, किं चाऽन्यत्र योगवासिष्ठगतो जीवन्मुक्तप्रसङ्गः विमृश्यतेऽपि। मम्मटोक्तमङ्गलश्लोके भारत्याः जयोक्तेः सारांशोऽपि लेखविशेषे

पुरस्क्रियते, तथा च रामायणीयबालकाण्डापेक्षं संस्कृतनाटकगतं वस्तुकथनं केन प्रकारेण सपरिवर्त्तमुपन्यस्यते तदपि विविच्यत इति विविधा एते विमर्शाः स्वाकृतिं लब्धवन्तः सन्ति। समेषां लेखलेखकानां कृते कार्तज्ञ्यं विज्ञाप्यते किं च आरण्यकपाठकानां सहृदयता भूयः सदाशयता च भूयोभूय आकाङ्क्ष्यते।

सित० - 2009

विद्वद्वशंवदः
गोपबन्धु मिश्र
सम्पादकः



# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. शब्दार्थरत्नं तत्कर्ता च | प्रो. उमाशङ्कर शर्मा 'ऋषिः' आचार्योऽध्यक्षचरश्च संस्कृतविभागः, पटना विश्वविद्यालयः (विद्यापुरी, पटना-८०००२०) | १ |
| २. श्रीमद्भागवते श्रीचैतन्यस्य गौडीयवैष्णववृत्तौ च नामसंकीर्त्तनम् | प्रो.राधामाधवदाशः आचार्यः, संस्कृतविभागः उत्कलविश्वविद्यालयः, वाणीविहारः, भुवनेश्वरम् | ९ |
| ३. क्तप्रत्ययविमर्शः | डॉ. भगवतशरणशुक्लः उपाचार्यः, व्याकरणविभागः संस्कृतविद्याधर्मविज्ञानसंकायः काशी हिन्दू विश्वविद्यालयः, वाराणसी | १९ |
| ४. औपनिषच्छिक्षाया उद्देश्यानि | डॉ. रमाकान्त मिश्रः उपाचार्यः, राष्ट्रियसंस्कृतसंस्थानम् शिक्षाशास्त्रविभागः, श्रीसदाशिवपरिसरः, पुरी | २७ |
| ५. भारती कवेर्जयति | डॉ. मिथिलेश कुमारः ए/२०६, पीपुल्स कोपरेटिव कालोनी कंकडबाग, पटना-२० | ३३ |
| ६. योगवासिष्ठे जीवन्मुक्त-विमर्शः | मीना देवी शोधच्छात्रा, वैदिकदर्शनविभागः काशी हिन्दू विश्वविद्यालयः, वाराणसी | ३५ |
| ७. श्रीचैतन्यदेवप्रचारितस्य वैष्णवधर्मस्य सामाजिकः प्रभावः | मौमिता भट्टाचार्यः शोधच्छात्रा, संस्कृतविभागः विश्वभारती, शान्तिनिकेतनम् | ४३ |
| ८. महाकविरत्नाकरविरचिते 'हरविजय' महाकाव्ये रसपरिपाकः | डॉ. अनिल कुमार मिश्रः २७१, तुर्कमानपुर, गोरखपुर | ४९ |

| | | |
|---|---|---|
| ९. वाल्मीकिरामायणीयबाल-काण्डापेक्षं परवर्तिप्रसिद्ध-रामनाटकानां समीक्षणम् | डॉ. कामेश्वर शुक्लः<br>संस्कृतविभागः, गौहाटी विश्वविद्यालयः,<br>गौहाटी | ५३ |
| १०. वेदेषु भक्तितत्त्वम् | डॉ.देवेन्द्र कुमार शर्मा<br>असिस्टेंट प्रोफेसर<br>वेदविभागः, ज. रा. राजस्थानसंस्कृत<br>महाविद्यालयः, जयपुरम् (राजस्थानम्) | ६१ |




# शब्दार्थरत्नं तत्कर्ता च

**प्रो. उमाशङ्करशर्मा 'ऋषिः'**

शब्दार्थरत्नं नाम व्याकरणदर्शनस्य ग्रन्थः पण्डिततारानाथतर्कवाचस्पतिना वाक्यपदीय-वैयाकरणभूषण-लघुमञ्जूषादिमननानन्तरं तत्साररूपेण रचयित्वा बालमनोविनोदाय 1851तमे खृष्टाब्दे प्रकाशितः। ग्रन्थस्यास्य तृतीयमन्तिमं च संस्करणं तारानाथस्य द्वितीयतनयेन जीवानन्दविद्यासागरेण 1902तमे वर्षे प्राकाश्यं नीतम्। दुःखस्यायं विषयो यत्तादृशं महत्त्वपूर्णं ग्रन्थरत्नं समीक्षैकचक्षुषां विदुषां नयनगोचरीभूतमपि नैव चर्चाविषयं गतम्। ग्रन्थकारस्तारानाथो ग्रन्थादौ मुखबन्धे एव निवेदयति–

**वैयाकरणसिद्धान्तो दुर्बोधो ग्रन्थगौरवात्।**
**अल्पायासेन तद्बोधसाधनाय ममोद्यमः।।** (श्लो.3)

ग्रन्थकारस्य प्रयासो मुख्यतो न्यायशास्त्रप्रवणानां वङ्गीयानां विदुषां कृते वर्तते यतस्ते व्याकरणसिद्धान्तानुपेक्षन्ते। अतएव तारानाथः **'तद्बोधनाय यतते मञ्जूषाद्यनुसारतः'** (श्लो.5)। किञ्चापरानपि ग्रन्थानसौ निर्दिशति येषां मूलमाश्रित्य ग्रन्थरत्नकलिकेयं प्ररोहति–

**शब्देन्दुशेखरे प्रोक्तं यथोक्तं शब्दकौस्तुभे।**
**भूषणादौ च यत्प्रोक्तं तन्मूलं लिख्यतेऽखिलम्।।**

शब्दार्थरत्नेऽस्मिन् व्याकारणशब्दार्थनिरुक्तिप्रभृति-वागुत्पत्ति–वर्णविचार-वाक्यार्थनिरूपण-पदकाण्डगत-प्रकृतिप्रत्ययनिरूपणक्रमेण च धात्वर्थ-नामार्थ-वृत्तिविचाराश्चेति शास्त्रीय-स्वानुभवोभयपद्धत्या प्रतिपादिता दृश्यन्ते। नैतद् विषयजातं भूषणमञ्जूषादिभिर्गतार्थमिति मन्तव्यम्। नव्यं मतं वैज्ञानिकदृष्ट्यास्मिन् निरूपितमिति आधुनिकाः पाश्चात्त्या विपश्चितोऽपि तर्कप्रवणा अत्र विश्वसनीयां सामग्रीं

प्राप्नुयुरित्येवास्य महत्त्वकारणम्। निबन्धेऽस्मिन् दृष्टान्तरूपेण किमप्युदाहरणं प्रस्तूयते।

वर्णोच्चारणविषयं प्रतिपिपादयिषुस्तारानाथः कथयति '**यद्यपि सर्वेषां वर्णानामुच्चारणे कण्ठव्यापार आवश्यकः, तथापि चकाराद्युच्चारणे ताल्वादि-व्यापारोऽप्यपेक्षित इति तन्मात्रकृतत्वेन वर्णानां वैलक्षण्यम्।.....कण्ठ्यत्वव्यवहारस्तु कण्ठशब्दस्य कण्ठमूलपरतया भाक्त एव। तवर्गस्य दन्तमूलीयत्वेऽयि दन्त्यत्ववत्। अन्यथा भग्नदन्तस्य तदनुच्चारणापत्तेः।**' एवमेव बाह्याभ्यन्तरप्रयत्नयोः स्वाभिमतमन्तरं दर्शयन् कथयति–'**आभ्यन्तरप्रयत्नास्तु वर्णोत्पत्तेः प्राग्भाविनः, बाह्यास्तु तदुत्पत्तेः पश्चाद्भाविनः इति विवेकः।**' इदं विस्तरेण व्याख्यातम्। वर्णोच्चारणविषये सर्वत्र पाणिनीयशिक्षोद्धरणानि दत्त्वापि स्वाभिमतं न जहाति ग्रन्थकारः।

वाक्यार्थबोधविचारोपक्रमे तु लेखकः सर्वानाधुनिकान् जनानेव स्वमनसि निधाय सरलतया विषयं प्रस्तौति–'**तत्र प्रथमं शब्दश्रवणादनन्तरं श्रोतुरात्मनि समुपस्थीयते तत्तदर्थः, उदीयते च योग्यतादिवशेन ततस्तेषां परस्परं विविष्टान्वयबोधेन। उपस्थितिश्च स्मृतिरेव। स्मृतिर्हि लोकेऽनुभूतपदार्थस्य उद्बोधकसहकृतसंस्कारेण जायमाना दृश्यते।.....एकसम्बन्धिज्ञानस्य अपरसम्बन्धिस्मारकतया अन्यत्र दर्शनात् शब्दार्थयोरपि परस्परं सम्बन्धित्वमवसीयते। अवसीयते च तस्यैव संस्कारोद्बोधकत्वम्।**' शब्दार्थसम्बन्धं च वृत्तिरूपं प्रतिपादयँस्तारानाथस्तस्य द्वैविध्यं दर्शयन् शक्तिनिरूपणक्रमेण योगसूत्रभाष्यस्य शारीरकभाष्यस्य च उद्धरणानि स्वस्मृत्या प्रस्तौति तत्समर्थनार्थमित्यस्य विशेषः। वाक्यपदीयोद्धरणानि तु बहुलीभूतानि ग्रन्थेऽस्मिन्नवलोक्यन्ते। तस्यैव ग्रन्थस्य प्रतिदर्शभूतं शब्दार्थरत्नं वाक्यकाण्ड-पदकाण्डरूपेण विभाजितमपि वर्तते। वर्णविचारस्त्वत्रातिरिक्तो विषयः इति न विस्मरणीयम्। वस्तुतो भाषादर्शनमेवास्य प्रतिपाद्यम्, न केवलं व्याकरणदर्शनम्।

सर्वा च वाग् ब्रह्मरूपेति भूयो भूयो दर्शयति ग्रन्थकारः। तत्समर्थनाय वाक्यपदीय-तृतीयकाण्डतो जातिसमुद्देशतः कारिकाद्वयं समुद्धृतम्–

**सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु।**
**जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः।।**
**तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते।**
**सा नित्या सा महानात्मा तामाहुस्त्वतलादयः।।**(वाक्यप.3.1.33-4)

किञ्च शब्दार्थयोराध्यात्मिकाभेदं स्वीकुर्वन्नपि तात्त्विकभेदवत्त्वं प्रति



पातञ्जलयोगसूत्रे '**तस्य वाचकः प्रणवः**' (योगसूत्रम् 1.27) इति प्रमाणं दत्तवान् ग्रन्थकारः। स्फोटरूपः शब्द एवार्थबोधक इति स्थापितवाँश्च।

ग्रन्थकृत्तारानाथः साधुशब्दवत् असाधुशब्दादपि बोधं स्थापयति, तत्र व्यवहारस्य प्राधान्यं दर्शयन् तस्य च प्रायेणापशब्दगर्भतया अपभ्रंशेषु शक्तिग्रहस्य व्यावहारिकं प्रामाण्यमुपन्यस्यति। व्यवहारे तु बालस्य अव्युत्पन्नतया प्रायशः साधुशब्द-व्यवहारानभिज्ञत्वात् शब्दार्थसम्बन्धविषयेऽपभ्रंशशब्देष्वेव शक्तिग्रहणं दृश्यते। '**सर्वे हि लोकाः बाल्यमारभ्य आमरणान्तं संस्कृतभाषामजानन्तोऽपि देशभाषया वाक्यादिकं विरचयन्ति, जानन्ति च प्रयोजकप्रयुक्तापशब्दार्थम्, इतरथा तच्छ्रवणादिष्टानिष्टादौ न स्यातां प्रवृत्तिनिवृत्ती**' (पृ.23)। तत्प्रसङ्गे साधुशब्द-स्मरणादर्थबोधसिद्धान्तं च सम्यक् तर्कबलेन निरस्यति। साधुशब्दादिवासाधुशब्दादपि समान एवार्थबोधः इति मतमुपस्थापयन् भर्तृहरेः कारिकां च पुण्यपापनियमकारिणीमुद्धरति ग्रन्थकारः। तथा हि–

**वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः।** (वा.प.3.3.30) इति।

वाक्यं च लिलक्षयिषुस्तारानाथो वाक्यपदीयगतमुद्धरणं दातुकामः कथयति–'**वाक्यं हि नाम कारकाद्यन्वित-क्रियाप्राधान्यैकविशेष्यबोधसाधन-पदकदम्बकम्।**' प्रमाणरूपेण च भर्तृहरिरुद्धृतः–

**साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम्।**
**क्रियाप्रधानमेकार्थं सगुणं वाक्यमुच्यते।।** (वा.प.2.4)

टिप्पणीं चात्र ददाति–'**भेदे = अण्डस्यापि वाक्यस्य प्रकृतिप्रत्ययादि-विभागोपाधिना पदानां परस्परं भेदे**' इतिरूपाम्। भिन्नानामेव साकाङ्क्षत्वोपपत्तेः-इति तस्य युक्तिः। काल्पनिकभेदवत्त्वेन साकाङ्क्षत्वादिति बोध्यम्। वास्तविकभेदस्तु नास्त्येव। '**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन**' (वा.प.1.73 उत्त.) इति वाक्यपदीयेऽपि अत्यन्तपदेन वास्तविकभेदराहित्यस्य प्रतिपादनात्। इत्येतद्ग्रन्थसन्दर्भेण ग्रन्थकारस्य विषयविवेचननैपुणी परिलक्ष्यते।

सर्वे वैयाकरणा वाक्ये क्रियायाः प्राधान्यं मन्यमाना तद्विवेचनं प्रति बाहुल्येन मुखराः सन्तीति प्रस्तुतः शब्दार्थरत्नकारोऽपि नात्रापवादः। क्रियाया व्याप्तिक्षेत्रं वाक्यकाण्डेऽपि सम्यङ् निभालयन्नसौ कारकसमभिव्याहारे च क्रियायाः स्थितिं शाब्दबोधद्वारेण दर्शयति। यथा–'**काश्यां हस्ताभ्यां पात्राद् विप्राय यज्ञदत्तो धनं**

साधु ददाति' इति कारकषट्क-क्रियाविशेषणसमन्वितस्य वाक्यस्य बोधमित्थं प्रस्तौति–"**यज्ञदत्ताभिन्नैकाश्रयिका काश्यधिकारणिका हस्तकरणिका पात्रापादानिका विप्रोद्देशिका धनाश्रयक-स्वत्वत्यागानुकूला साध्वभिन्ना वर्तमाना भावना**" इति। अत्र वचनादिरहितः सरल एव बोधो दर्शितः (पृ.45)।

पदकाण्डं त्वस्य ग्रन्थस्य विपुलकायं शतपृष्ठात्मकं (पृ.46-147) वर्तते। तत्र क्रमशः पदलक्षणम्, प्रकृति-प्रत्ययस्वरूपम्, धातुरूपा प्रकृतिः, धातुभेदः, धात्वर्थः, धातुमूलाः प्रत्ययाः, लकारार्थाः, कृतः, नामरूपा प्रकृतिः, नामार्थः, वृत्तिषु समासवृत्तिः, तद्धिताः, निपातार्थाः, नञर्थाः, सुबर्थश्चेति यथायथं शास्त्रानुसारेण क्वचित्स्वानुभवेन च लेखकेन प्रतिपादिताः सन्ति।

पदत्वनिरूपणप्रसङ्गेऽयं लेखकः पाणिनीयं सूत्रं 'सुप्तिङन्तं पदम्' (1.4.14) इति बहुमन्यमानः '**अर्थबोधकः प्रयोगार्हवर्णसमुदायः पदम्, उपसर्गनिपातयोरपि द्योत्यार्थबोधकतया पदत्वम्**' इति निरूपयति (पृ.46)। विषयेऽस्मिन् विस्तरेण व्याख्यानं कृतं ग्रन्थकारेण। वैयाकरणभूषणसारे (का.46 वृत्तौ) समुद्धृतेन श्लोकेन समर्थनमस्य च कृतमस्ति–

**चतुर्विधे पदे चात्र द्विविधस्वार्थनिर्णयः।**
**क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः।।** इति।

प्रकृतिप्रत्ययस्वरूपे चानुपदमेव निर्धारिते स्तस्तारानाथेन। तथाहि–प्रकृतिर्नाम अर्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेषः (पृ.51)। किञ्च नाम–धातुभेदाद् द्विविधा प्रकृतिः। सुप्तिङ्भेदात्सिद्धान्ते द्विविधश्च प्रत्ययः। किञ्च यदि अवयवशक्तिः स्वीक्रियते तदा तु कृत्-तद्धित-सनादिभेदेन नानाविधाः प्रत्ययाः इत्यवधेयम्। प्रकृतिरूपस्य धातोर्निर्वचने विवेचने च तस्य क्रियावाचकत्वं सकर्मकाकर्मकभेदविवरणं च यथाशास्त्रं ददाति ग्रन्थकारः। सकर्मका धातव एककर्मक-द्विकर्मकभेदेन दर्शिताः।

किञ्च सकर्मकस्याकर्मकत्वप्रसङ्गे भर्तृहरिणा विहितायाः कारिकायाः '**धातोरर्थान्तरे वृत्तेः**' (वा.प.3.7.88) इत्यादेः अंशभूतस्य 'कर्मणोऽविवक्षातः' इत्यस्य व्याख्याने अविवक्षा-पद-विमर्शं च साधु करोति ग्रन्थकृत्–(1)**अविवक्षा नाम येन रूपेण अन्वयविवक्षया यस्य कर्मसंज्ञा तेन रूपेण अन्वयविवक्षाऽभावः। अत्र क्वचित्कर्मणोऽविवक्षया यथा–'पच्यते' इत्यादौ। क्वचिच्च कर्मत्वाविवक्षया यथा 'मातुः स्मर्यते' इत्यादौ।....स्मरणादेः कर्मण्यन्वयसत्त्वेऽपि कर्मत्वेन तदन्वयाभावात् अकर्मकत्वम्।**



(2) **क्वचित्तु कार्यप्रवृत्तिवेलायाम् अविवक्षा, पश्चाद् विवक्षा। यथा–कृतपूर्वी कटम्।** (पृ.51) सर्व एवायं सन्दर्भः सम्यग्व्याख्यात इत्यलमत्र विस्तरेण। कर्मवद्भावविमर्शे च ग्रन्थकृतस्तारानाथस्य समानैव वैदुषी चकास्ति। धात्वर्थनिरूपणे खलु फलव्यापारविमर्शनं शास्त्रानुसार्यपि सरलभाषासमन्वितमिति सर्वथाऽऽवर्जकमेव।

धातूनामर्थविशेषा विस्तरेण शब्दार्थरत्ने दर्शिताः। यथा–"**जानातेर्विषयतया ज्ञानं फलम्, आत्ममनःसंयोगो व्यापारः अर्थः। अतो 'मनो जानाति' इत्याद्युपपत्तिः। 'आत्मानं जानाति' इत्यादौ तु शरीरावच्छिन्नात्मनः कर्मत्वम्, अन्तःकरणावच्छिन्नस्य तु कर्तृत्वम् इति 'कर्मवत्.' (पा.सू.3.1.87) इति सूत्रभाष्ये स्पष्टम्। इदमेव ज्ञानरूपं फलं चक्षुरादिकरणकत्वेन विवक्षितं दृश्यादेरर्थः। तथा हि चक्षुर्जन्यं ज्ञानं दृशेरर्थः, श्रोत्रजन्यं शृणोतेः.....**" (पृ.63)। एवमिच्छा-द्वेष-प्रयत्नादिसम्बद्धा धातवो विस्तरेण विषयप्रतिपादनपुरस्सरं वर्णिताः। इह तारानाथस्य धात्वर्थविशेष-प्रकाशप्रवृत्तिरुदाह्रियते-**पराभिभवेच्छा स्पर्धाऽकर्मिका, अभिभवेच्छामात्रविवक्षायां सकर्मिका। परदुःख-प्रहरणेच्छा दयाऽकर्मिका, निर्दोषत्वेनाभिमानो विश्वासः, स्वावधिकोत्कर्षज्ञापनं नमनं सकर्मकम्।....आस्वादनं रसानुभवो रुचिश्च यथाक्रमं सकर्मकोऽकर्मकश्च। जिह्वाकरणको रसानुभवो लेहनम्, आकर्षणपूर्वकः स एव चोषणम्। दन्तकरणकः स एव चर्वणमिति विवेकः।** (पृ.70)।**....शोभाविशेषोत्पत्तिः मण्डनम् अकर्मकम्, तत्करणविवक्षायां सकर्मकम्। गर्वहेतुकाभिमानश्चित्तवृत्तिविशेषोऽहंकारः अकर्मकः। इतरभेदज्ञापनं विशेषणं लक्षणं च। इत्येवं बहवो धातवः क्रियाविशेषवन्तः परिभाषितास्तारानाथेन** (पृ.67-72)। एतेष्वर्थेषु धातूनां शक्तिः, अर्थान्तरेषु च लक्षणा-इति 'अनेकार्था धातवः' इत्यभियुक्तोक्तिः लक्ष्यार्थविषयेतिमन्तव्या।

प्रत्ययान्तानामपि धातूनामर्थनिरूपणे महानेव प्रयासो ग्रन्थकृतो दृश्यते (पृ.72-83)। लकारार्थविवेचनं च तदनन्तरं विस्तरेण कृतम्। विशेषतो लिङ्लकारस्यार्थनिरूपणे विध्यादयः पृथक् पृथग् दर्शयता ग्रन्थकारेण मीमांसादर्शनगतं विवेचनमपि समावेशितम्। मण्डनमिश्रपादैर्निरूपितो वादोऽपि प्रकरणेऽस्मिन् समुद्धृतः–

**पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।**
**प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्।।** (पृ.89)

यथाक्रमं च कृदर्था नामार्थाश्च सम्यग् विवेचिताः। नामार्थविषये एकत्वादि-पञ्चकपर्यन्ताः सर्वेऽपि वादा यथाशास्त्रं दर्शिता विश्लेषिताश्च। नामार्थपञ्चकं तु

जातिर्द्रव्यं लिङ्गं संख्या कारकमिति रूपम्। तथोक्तमभियुक्तैः–

**स्वार्थो द्रव्यं च लिङ्गं च संख्या कर्मादिरेव च।**

**अमी पञ्चैव नामार्थाः त्रयः केषाञ्चिदग्रिमाः।।**

(वैयाकरणभूषणसारदर्पणटीकायाम् पृ. 201 तमे उद्धृतम्)

जातिद्रव्ययोर्मध्ये भेदं दिदर्शयिषुस्तारानाथो ब्रूते–**जातिर्नाम त्वतलादिबोध्या ब्रह्मसत्तादिरूपा उपाधिसामान्यविशेषणधर्मादिपदवाच्या व्यक्तिवृत्तिधर्म-विशेषः।....द्रव्यं तु व्यक्तिविशेषः लिङ्गसंख्याद्यन्वयि सत्त्वादिपदाभिधेयम्**(पृ.106-7)। उभयत्र भर्तृहरिकारिके (वा.प.3.1.33 तथा 3.4.3) समुद्धृते स्तः।

वृत्तिविवेचनं चास्य ग्रन्थरत्नस्य विशेषेणावधानमर्हति। वृत्तिपदनिर्वचने ग्रन्थकृदाह-**वृत्तिर्नाम अवयवशक्तिसहकृतसमुदायशक्त्या अर्थविशेषबोधकः शब्दविशेषः।** **'परार्थाभिधानं वृत्तिः'** इति लक्षणस्य विवरणे **'परस्य अवयवातिरिक्तस्य अर्थस्य बोधसाधनं वृत्तिरिति तदर्थात्'** इत्येवाचष्टे। शब्दार्थसम्बन्धरूप-वृत्तिमत्त्वाच्च समुदायस्य वृत्तिशब्दवाच्यता इति च। क्रमशः समासवृत्तिविवेचनप्रसङ्गे समासभेदाः, तद्धितवृत्तौ च मुख्यानां प्रत्ययानामर्थाश्च दर्शिताः। प्रसङ्गतो निपातार्थनिरूपणे नञर्थस्य समासाङ्गभूततया स्फोरणमपि कृतम्।

अन्ततः सुबर्थप्रकरणमुपक्रान्तम्। तत्र कर्मकारकविवेचनं विस्तरं लभते। इहापि द्विकर्मकधातूनामर्थनिरूपणे विशेषः। तथा हि–**अन्तःस्थित-द्रवद्रव्य-विभागानुकूलो व्यापारो दुहेरर्थः।.....निर्गमप्रतिबन्धपूर्वकान्तःस्थित्यनुकूलव्यापारो रुधेरर्थः** इत्यादि (पृ.131-21)। प्रत्येकं च तार्किकविधिना प्रतिपादितः। एवमेव सर्वेऽपि विभक्त्यर्थाः शास्त्रानुकूलेन स्वानुभवानुप्राणितेन च विधिना यथायथं विवेचिताः सन्ति। कृत्स्नस्यापि व्याकरणदर्शनस्य सरलसरलया रीत्या निरूपणे शब्दार्थरत्न-कृत्तारानाथो भट्टाचार्यः प्रशस्तिभाक् पण्डितानां तच्छास्त्रावगाहनपराणां पुरत इति न संशयः।

## ग्रन्थकारपरिचयः

संस्कृतवाङ्मयस्येतिहासे विचित्रेयं परम्परा लभ्यते यद्रचनाः भूयो भूयः समीक्ष्यन्ते, रचयितारश्च विशेषेणोपेक्ष्यन्ते। अपेक्षाकृताधुनिकोऽपि पण्डितस्तारानाथः स्वरचिताभ्यां कोशाभ्यां शब्दस्तोममहानिधि-वाचस्पत्याभ्यामेव किमपि ज्ञायते। तदपेक्षया तु तस्य द्वितीयः पुत्रो जीवानन्दविद्यासागर एव ग्रन्थप्रकाशनरचनावशादधिकतरं प्रख्यातः। प्रायेण



शतत्रयग्रन्थानां प्राचीनानां नवीनानाञ्च प्रकाशनं तेन कृतमिति विदितमेव विदुषाम्।

पण्डिततारानाथभट्टाचार्यस्य शब्दस्तोममहानिधिग्रन्थस्य प्रारम्भे प्रफुल्लमित्र-महाभागेन पण्डितस्यास्य संस्मरण (Memoir) रूपः परिचयो दत्तस्तत एवावकृष्य समासेनेह किमपि प्रस्तूयते। तारानाथः (1812ई.-1885ई.) पश्चिमवङ्गराज्यस्य कालनाग्रामवासी आसीत्। तत्रैव प्रसिद्धानां विदुषां ब्राह्मणानां भट्टाचार्यरूपेणाख्यातानां वंशे जातस्य पण्डितकालिदासभट्टाचार्यस्य तनयत्वेन 1812 ई. वर्षे जनिं लेभे। कालिदासेन स्वग्रामे कालनाभिधेये संस्कृतविद्यालयः (वंगराज्ये चतुष्पाठीति संज्ञया प्रथितः) स्थापितो यत्र काव्य–व्याकरण–कोशालंकारधर्मशास्त्रप्रभृतीनि शास्त्राणि पाठ्यन्ते स्म। तत्राधीतवता तारानाथेनायुषो दशमवर्षे एव मुग्धबोधव्याकरणं कण्ठस्थीकृतम्। तदनु ग्रन्थान्तराणि अधीत्य 1830ई. वर्षे कोलकातास्थे राजकीयसंस्कृतकालेजे प्रवेशं प्राप। तत्र दर्शनशास्त्राणां प्रशिक्षणं प्रख्यातेभ्यो विद्वद्वरेण्येभ्योऽसौ सम्यगलभत। तस्य मेधया तर्कशास्त्रपाटवेन च प्रभाविताः शिक्षकाः 'तर्कवाचस्पतिः' इति उपाधिं तस्मै प्रदत्तवन्तः। अनेनैवाभिधानेन 'तारानाथतर्कवाचस्पतिः' इत्येतेन तदनन्तरं सर्वत्रासौ ज्ञातः। संस्कृतकालेजे एवासौ पण्डितस्य ईश्वरचन्द्रविद्यासागरस्य सम्पर्के समागतः। विद्यासागरमहोदयस्तारानाथस्य प्रतिभया पूर्णं प्रभावितः।

कोलकातास्थस्य संस्कृतकालेजस्य शिक्षाविषयान् सम्यगधीत्य तारानाथो वाराणसीं गतो यत्र पाणिनीयं व्याकरणं वेदान्तशास्त्रञ्च तेन चत्वारि वर्षाण्यधीते। तत्र काशीनाथशास्त्रिणा सह पाणिनीये तन्त्रे शास्त्रार्थकाले नाना दुरूहप्रकरणानि तेनाधिगतानि। वाराणसीतः प्रत्यावृत्तस्तारानाथः स्वग्रामे एव पाठशालायां बहूँश्छात्रान्नानाविषयानध्यापयितुं प्रारभत। पण्डित ईश्वरचन्द्रविद्यासागरो दिसम्बरमासे 1844ई. वर्षे कोलकातातः पदातिरेव कालनाग्रामम् अष्टचत्वारिंशन्मीलदूरं तारानाथं द्रष्टुकामो गतः, तत्र च पण्डितवर्यं छात्रसमूहमध्यापयन्तमवलोक्य सुतरां विस्मितः। तस्यानुशंसया संस्कृतकालेजे 1845ई. वर्षे पाणिनीयं व्याकरणम् अध्यापयितुं तारानाथः प्रथमवर्गीय आचार्यः (Class I Professor) नियुक्तः।

शब्दार्थरत्नमेव पण्डिततारानाथस्य प्रथमः प्रकाशितो ग्रन्थः (1851ई.)। अनुपदमेवास्य बङ्गभाषाग्रन्थः 'वाक्यमञ्जरी'–नामा प्रकाशितः। ग्रन्थद्वयमपि विक्रयपटले न सफलतामवाप। तारानाथतर्कवाचस्पतिरेकत्र पुस्तकव्यवसायी बभूव, अपरत्र

शास्त्रावगाहनकुशलश्चासीत्। तदनन्तरं तस्य मनसि सर्वाङ्गपूर्णस्य संस्कृतशब्दकोषस्य रचनाभिलाषः समुत्पन्नः। तस्मिन् कोषे शब्दव्युत्पत्तिः, अर्थभेदाः, आनुषङ्गिकाश्च विषयाः स्युरिति तस्य योजना बभूव। प्रसन्नकुमारसर्वाधिकारि-कृष्णकमल-भट्टाचार्यमहोदययोराग्रहेण पूर्वं संक्षिप्तः कोषग्रन्थः 'शब्दस्तोममहानिधिः' नाम तेन संकलितः, 1869-70ई. वर्षे प्रकाशितः। सम्प्रति पुनर्मुद्रितोऽसौ चौखम्बा संस्कृतसीरिजकार्यालयेन सौलभ्यं च गतः।

अपरस्य विशालस्य संस्कृतकोषस्य 'वाचस्पत्यम्' इत्यभिधानस्य विरचने प्रकाशने च तारानाथेन महान् श्रमः कृतः, विपुलं चार्थकष्टमनुभूतम्। 238पृष्ठात्मकमस्य प्रथमं खण्डं 1873ई. वर्षे प्रकाशितम्। तस्मिन्नेव वर्षे तारानाथः संस्कृतकालेजतो निवृत्तसेवो जातः, सेवानिवृत्तिवृत्तिश्च (Pension) तस्य सप्ततिमुद्रारूपा निश्चिता बभूव। द्वादश वर्षाणि निरन्तरं कृतश्रमेणानेन पण्डितेन वाचस्पत्यकोषस्य खण्डानि क्रमशः प्रकाशितानि। अन्तिमं षष्ठं खण्डं 1884 ई. वर्षे प्रकाशितम्। तेनानेकानि प्राचीनकाव्यानि च स्वटीकाभिः सम्पाद्य प्रकाशितानि यथा रत्नावली, कुमारसम्भवम्, वेणीसंहारः, मुद्राराक्षसम्, भामिनीविलासः, कादम्बरी, दशकुमारचरितम् इत्यादीनि। किञ्च–सिद्धान्तकौमुदी, सिद्धान्तबिन्दुसारः, सांख्यतत्त्वकौमुदी, वैयाकरणभूषणसारः, अष्टाध्यायीसूत्रमित्यादयः शास्त्रीया ग्रन्थाश्च स्वटिप्पणीभिः परिष्कृत्य तेन प्रकाशिताः।

कोलकातासंस्कृतकालेजस्य तदानीन्तनः प्राचार्यः प्रख्यातः प्राच्यविद्याविशारदः ई.बी.कॉवेलमहोदयः तस्य विषयेऽलिखत्–'नास्ति तारानाथसदृशः कश्चन पण्डितो बङ्गप्रदेशे'। सिद्धान्तकौमुदीप्रकाशनकालेऽपि कावेलोऽवदत्–'एतादृशस्य बहुमूल्यस्य ग्रन्थस्य प्रकाशनेन संस्कृतजगन्महदुपकृतमस्ति।'

तारानाथो ज्योतिर्विद्यायां पाककलायां च प्रवीण आसीदिति प्रागुक्तेन संस्मरणलेखेन स्फुटीभवति। 1860ई. वर्षे जयपुरनरेशः महाराजजयसिंहः कोलकातासंस्कृतकालेजं समागतस्तारानाथस्य मेधया वैदुष्या चावर्जितस्तं जयपुरमाहूतवान्। श्रूयते यत्तत्रायं वैष्णवदर्शनप्रतिपादने सर्वानेव विदुषः पराजितवान्।

वाराणस्यामस्य विपश्चितो निधनं 23 जूनतिथौ 1885 ई. वर्षे जातम्। विरला एव तदुपमाः सर्वशास्त्रकुशलाः शेमुषीजुषः।

❖



# श्रीमद्भागवतमहापुराणं श्रीचैतन्यस्य गौडीय-वैष्णवधर्मधारायां नामसंकीर्त्तनस्य माहात्म्यं च

प्रो. राधामाधवदाशः

## 1. प्रबन्धसारांशः

भारतीयसंस्कृतौ विविधधर्मधाराणामुद्भवविकासयोर्मूलस्रोतोरूपेण पुराण-साहित्यस्य विशिष्टं योगदानं निर्विवादं सिद्धमस्ति। शैवशाक्तवैष्णवगाणपतादि-सकलधार्मिकपरम्पराणामितिहासानुशीलनेन पुराणसाहित्यस्य सेयं भूमिका स्पष्टीभवति। श्रीचैतन्यमहाप्रभुणा गौडीयवैष्णवपरम्परायां श्रीहरिनामसंकीर्त्तनस्य सुमहद्गुरुत्वमारोपितं स्वकीयजीवनचर्यायामपि प्रकटितम्। श्रीनामोच्चारणादिविषये श्रीमद्भागवतस्य विविधप्रसङ्गे विभिन्नचरित्राणाञ्चोक्तिषु सिद्धान्तिततत्त्वजातं श्रीचैतन्यस्य नामसंकीर्त्तनप्रचारैकसिद्धान्तस्य प्रामाणिकहेतुरिति सुवचम्। भारतीयसंस्कृतौ सिद्धान्तानामभावो नास्ति। किन्तु परमभागवतस्य श्रीचैतन्यस्य व्यक्तित्वमप्यनितर-साधारणमिति नास्ति संशयावकाशः। हरे कृष्ण हरे रामादिमहामन्त्रसंकीर्त्तनवेलायां भावविभोरतया छन्दोविच्छित्त्या च सावलीलं कदाचिदुद्दण्डं नृत्यपरस्य श्रीचैतन्यस्य तन्मयतया विगलदश्रुधारतया प्रभाविताास्तस्य प्रत्यक्षद्रष्टारः श्रोतारश्च तच्छिष्यतां गता वैष्णवधर्मं च स्वीकृतवन्तः। तदीयामपूर्वभावमयीं प्रेममयीं मूर्तिं दर्शं दर्शं तन्मुखनिःसृतहरिनामसंकीर्त्तनं श्रावं श्रावं जनजीवनमियत्प्रभावितमासीद्यत्समग्र-पूर्वभारतवर्षस्य तटीयप्रदेशाऽसम–बङ्गाल–ओडिशा–आन्ध्रप्रभृतीनामधिवासिषु नैके वैष्णवाः सञ्जाताः।

बुद्धिवादिनां साधारणानाञ्च जनानाञ्चेतांसि समरूपेण भक्तिरसेन प्लावयितुं समर्थानां श्रीचैतन्यमुखारविन्दनिःसृतानां हरिनाम्नां जप-कीर्त्तन-संकीर्त्तनादि-श्रीमद्भागवतीयसिद्धान्तानामुल्लेखपुरःसरं समीक्षणञ्च विधीयते प्रस्तुतेऽस्मिन्लेखे।

**2. उपक्रमः**

**जपतो हरिनामानि स्थाने शतगुणाधिकः।**
**आत्मानञ्च पुनात्युच्चैर्जपन् श्रोतॄन्पुनाति च।।**

(श्रीनारदीयपुराणे प्रह्लादस्य वाक्यम्) हरिनामजपपरायणेभ्यो भक्तेभ्य उच्चस्वरेण हरिनामसंकीर्त्तनकारिणः शतगुणैः श्रेयांसः सन्तीति शास्त्रवचनं प्रणिधेयं यतो हि जपकारी केवलमात्मानं पुनाति किन्तु उच्चस्वरेण संकीर्त्तनकारी आत्मना सह निखिलश्रोतॄनपि पावयति। पशुपक्षिणः कीटपतङ्गा लतागुल्मादयः सकलनिर्वाग्जीवा अपि उच्चैः कीर्त्तितहरिनामश्रवणेन भवसागरं तरन्ति। अत एव कलियुगपावनावतारि-महापुरुषरूपेण सम्मानतां गतः श्रीचैतन्यमहाप्रभुरनुक्षणं सर्वेभ्यः श्रीहरिनामकीर्त्तनस्योपदेशं कृतवानस्ति 'कीर्त्तनीयः सदा हरिः' इति। बृहन्नारदीयपुराणेऽपि समर्थितोऽयं सिद्धान्तः। यथोक्तं तत्र

**हरेर्नाम हरेर्नाम हरर्नामैव केवलम्।**
**कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा।।**

स्मर्यते श्रीरूपगोस्वामिनः श्रीनामाष्टकात्–

**चेतोदर्पणमार्जनं भवमहादावाग्निनिर्वापणं**
**श्रेयःकैरवचन्द्रिकावितरणं विद्यावधूजीवनम्।**
**आनन्दाम्बुधिवर्धनं प्रतिपदं पूर्णामृतास्वादनं**
**सर्वात्मस्नपनं करं विजयते श्रीकृष्णसंकीर्त्तनम्।।**

श्रीचैतन्यमहाप्रभोर्गौडीयवैष्णवधर्मदर्शनस्य मौलिकपृष्ठभूमेः सैद्धान्तिकस्रोतोऽस्ति श्रीमद्भागवतमहापुराणम्। संकीर्तना भक्तिरिति सुप्रथिता भगवन्नामस्मरणजपकीर्त्तनादीनां याऽपरिहार्यता श्रीचैतन्येन गौड़ीयैरितरविद्वद्गोस्वामिभिश्च प्रतिपादितं तदीयं मूलं तु श्रीमद्भागवतमहापुराणे सुतरां लक्षितं श्रीशौनक-सूतमुनि-नारदमुनि-भीष्म-देवहूति-विष्णुदूतगणाऽजामिलप्रभृतीनां पात्राणां मुखेन भगवन्नामजपकीर्त्तनादीनामपूर्वमहिमा श्रीमद्भागवतमहापुराणे सयुक्तिकम्प्रतिपादितं दृश्यते।

## 3.गौडीयपरम्परायां नामसंकीर्त्तनसिद्धान्तानुकूला शास्त्रीया युक्तिः

भगवन्नाम्नां पुनःपुनरावृत्तिद्वारा प्रायतोऽपराधप्रवणानां मानवानामपराध-निष्कृतिर्भवतीति बहूनि शास्त्रप्रमाणानि वर्त्तन्ते। पद्मपुराणे नामापराधस्तोत्रे



श्रीनाममाहात्म्यवर्णनमुखेन सैव प्रयोजनीयतोपदिष्टा। अविश्रान्ततया कीर्त्तिता भगवन्नामसमूहोऽभीष्टसाधको भवति। त्रैलोक्यमोहनतन्त्रादिशास्त्रेषु अष्टादशाक्षरादि-मन्त्राणामावृत्तेर्विधानं दृश्यते। ब्रह्मवैवर्त्तपुराणे एवमुच्यते यदहोरात्रं कृष्ण कृष्णेति नाम संकीर्त्तयन्तो ब्रह्मघातिनो यथेच्छसुरापायिणोऽपि मनुष्याः सिद्धिलाभं कुर्वन्तीति। उभये सिद्धा असिद्धाश्च साधकाः श्रीभगवन्नाम्नां पुनरावृत्तिफलेन भगवत्प्रीतेः प्रतिबन्धकरूपेभ्योऽश्रद्धा-कुटिलता-जडाभिनिवेश-भक्तिशैथिल्यप्रभृतिभ्य आपराधिक-कार्येभ्यः सहजतया विरता भवन्ति। श्रीशङ्कराचार्येण श्रीविष्णुसहस्रनामस्तोत्रस्य फलश्रुतिभाष्येऽभिहितम्–**'सर्वे पापा विनश्यन्ति श्रीहरिनामकीर्त्तनात्'** इति। तथैव तस्य चतुर्दशश्लोकभाष्येऽपि **'श्रद्धाभक्त्योरभावेऽपि नामसंकीर्त्तनं समस्तदुरितं नाशयति...स्मरणं ध्यानं च नामसंकीर्त्तनेऽन्तर्भूतम्....**ऋग्वेदे चास्य **जानन्तो नामचिद् विवक्तनमहस्ते विष्णो सुमतिं भजामहे'** इत्यादिवाक्यै-र्विष्णोर्नामसंकीर्त्तनं सम्यग्ज्ञानप्राप्तये विहितम्। अत एव गरुडपुराणे (9.234.23)-

**सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः।**
**यन्मुहूर्त्तं क्षणं वापि वासुदेवं न कीर्त्तयेत्।।**

इत्यादिवचनेन शतप्रतिशतमुहूर्तं भगवन्नामस्मरणकीर्त्तनादिकर्मभिर्विनियोजनीयम्। तत्रैव मानवजीवनस्य साफल्यम्।

## 4. नाम्यपेक्षया तन्नाम्नां महत्तरत्वम्

श्रीपद्मपुराणे (चतुर्विंशाध्याये) नामापराधास्त्रेभ्यो मोचनाय श्रीनामाश्रयो हि केवल उपाय इति ऋषीणामुपदेशः। स यथा–

**स्वयं नारायणो देवः स्वनाम्नि जगतां गुरुः।**
**आत्मनोऽभ्यधिकां शक्तिं स्थापयामास सुव्रताः।।**
**अत्र ये विवदन्ते वा आयासलघुदर्शनात्।**
**फलानां गौरवाच्चापि ते यान्ति नरकं बहु।।**
**तस्माद्धरौ भक्तिमान्स्याद्धरिनामपरायणः।**
**पूजकं पृष्ठतो रक्षेन्नामिनं वक्षसि प्रभुः।।**

श्रीभगवता स्वनाम्नि निजापेक्षयाऽधिका शक्तिः स्थापिता। अत एव नामयज्ञकर्मणि आयासन्यूनतया साकं प्राप्यफलं च महत्तरं वर्त्तते। नामभजनशीला मानवाः श्रीहरौ भक्तिमन्तः सन्ति। स श्रीहरिरेतादृशान्नामाश्रयिणः सेवकान्पृष्ठे स्थापयन्समस्तविपत्तिभ्यो

रक्षति। श्रीचैतन्यप्रवर्त्तिते गौडीयसमाजे प्रायेण सर्व एव न केवलं नामग्राहिणोऽपि तु नामाश्रयिणः सन्ति–

वृन्दावने वैसे यत वैष्णवमण्डल। कृष्णनाम परायण परम मङ्गल।।
ताहार प्राणधन नित्यानन्द चैतन्य। राधाकृष्ण भक्ति विना नाहि जाने अन्य।।

(चै.च. 1.5.204-5)

तथैव हरिभक्तिविलासे–

कलिकालकुसर्पस्य तीक्ष्णदंष्ट्रस्य मा भयम्।
गोविन्दनामदावेन दग्धो यास्यति भस्मताम्।।
हरिनामपरा ये च घोरे कलियुगे नराः।
त एव कृतकृत्याश्च न कलिर्बाधते हि तान्।।

(हरिभक्तिविलासः11.365-66)

हरे कृष्ण हरे कृष्ण कृष्ण हरे हरे। हरे राम हरे राम राम राम हरे हरे।।
षोडशैतानि नामानि द्वात्रिंशद्वर्णकानि हि। कलौ युगे महामन्त्रः सम्मतो जीवतारणे।।
उत्सृज्यैतन्महामन्त्रं ये त्वन्यत्कल्पितं पदम्। महानामेति गायन्ति ते शास्त्रगुरुलङ्घिनः।।

(अनन्तसंहिता)

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे। हरे राम हरे राम राम हरे हरे।।
द्वात्रिंशदक्षराण्येव कलौ नामानि सर्वदा। सर्वशक्तिमयं मन्त्रं हरिनाम तपोधन।।

(श्रीराधातन्त्रम्, द्वितीयपटलम्, 8-10)

ब्रह्माण्डपुराणे स एवाशयो यथा–

ग्रहणाद्यस्य मन्त्रस्य देही ब्रह्ममयो भवेत्।
सद्यः पूतः सुरापोऽपि सर्वसिद्धियुतो भवेत्।।
देहं तेऽभिधास्यामि महाभागवतो ह्यसि।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।
हरे राम हरे राम राम राम हरे हरे।।
इति षोडशकं नाम्नां त्रिकालकल्मषापहम्।
नातः परतरोपायः सर्ववेदेषु विद्यते।।

ब्रह्मयामलतन्त्रे महादेवपार्वतीसंवादक्रमेणोक्तमस्ति–

हरिं विना नास्ति किञ्चित्पापनिस्तारकं कलौ।



तस्माल्लोकोद्धारणार्थं हरिनाम प्रकाशयेत्।।
सर्वत्र मुच्यते लोको महापापात्कलौ युगे।
हरे कृष्ण पादद्वयं कृष्णेति च पदद्वयम्।।
तदन्ते च महादेवि राम राम द्वयं वदेत्।
हरे हरे ततो ब्रूयाद्धरिनाम समुद्धरेत्।
महामन्त्रं च कृष्णस्य सर्वपापप्रणाशकम्।।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।
हरे राम हरे राम राम राम हरे हरे।।
इत्यष्टशतकं नाम्नां त्रिकालकल्मषापहम्।
नातः परतरोपायः सर्ववेदेषु विद्यते।।
तन्नामकीर्त्तनं भूयस्तापत्रयविनाशनम्।
सर्वेषामेव पापानां प्रायश्चित्तमुदाहृतम्।।
नातः परतरं पुण्यं त्रिषु लोकेषु विद्यते।
नामसंकीर्त्तनादेव तारकं ब्रह्म दृश्यते।
नामसंकीर्त्तनं तस्मात्सदा कार्यं विपश्चिता।।

(ब्रह्माण्डपुराणम् उत्तरखण्डम् 6.55-60 व्यासोक्तिः सूतम्प्रति)। इत्थं हरिनाम्नां महत्त्वनिचयविषये शास्त्रीयप्रमाणान्युपस्थापयितुं शक्यन्ते।

## 5. गौडीयपरम्परायां भागवतपुराणस्य प्रामाण्यविचारः

भगवन्नामजपस्मरणकीर्त्तनादीनां महत्त्वनिचयः श्रीमद्भागवतपुराणे भूयो वर्णितोऽस्ति। गौडीयवैष्णवधर्मधारणायां नामसंकीर्त्तनसिद्धान्तस्य परमध्येयत्वं पूर्वं प्रतिपादितमेव। यथा प्रतिज्ञातपूर्वं तानि भागवतपुराणीयप्रमाणानि अधो विन्यस्यन्ते। नैमिष्यारण्ये श्रीशौनकमुनिः समवेतं श्रोतृमुनिवृन्दं संबोध्य वदति–

**आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्।**
**ततः सद्यो विमुच्येत यद् बिभेति स्वयं भयम्।।** (भा.पु.1.1.14)

भीतिप्रदजननमरणप्रवाहपतितमानवा विवशाः सन्तस्तस्यैव भगवतो वासुदेवस्य नामकीर्त्तनं कुर्वन्तः संसारादतिशीघ्रं पारं गच्छन्ति। तदेवैकं नामास्ति यस्मान्महाकालोऽपि बिभेति। श्रीसूतमुनेर्निम्नोक्तवचनं प्रणिधेयं यत्रोच्यते - यथा अरसिकोऽभिनयकलानभिज्ञः कश्चनाऽभिनेतृणां वाचिककायिकाद्यभिनयकलामनभिज्ञाय तस्य पुरतोऽभिनीतस्य

कथावस्तुनो रसास्वादनेऽसमर्थो भवति तद्वदज्ञानविमोहितानां कृते भगवन्नाममहिमा नितरामगोचरीभवति। न **चास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः। नामानि रूपाणि मनोवचोभिः सन्तन्वतो नटचर्यामिवाज्ञः।।** (भा.पु. 1.3.37) भरतमुनिः स्वशिष्यं व्यासं प्रति साधूनामनन्तस्य भगवतो यशोऽङ्किकतनामानि श्रोतुं गातुं स्तोतुमुत्सुकताविषयमुपदिशन्वदति-

**तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि।**

**नामान्यनन्तस्य यशोऽङ्किकतानि यत्शृण्वन्ति गायन्ति गुणन्ति साधवः।।**

(भा.पु. 1.5.11)

पञ्चमस्कन्धे श्रीनारदो व्यासमुनये सुभक्तस्याऽऽचरणोपदेशच्छलेन भगवन्नाम-महिमानं विवृणोति। **कुर्वाणा यत्र कर्माणि भगवच्छिक्षया सकृत्। गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च।।** (भा.पु.1.5.36) **यत्करोषि यदश्नासि यज्जुहोसि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।।** इत्यादिगतोक्तशिक्षानुगुणं यदा मानवाः कर्म कर्त्तुं प्रवर्त्तन्ते तदा एतादृशं भगवद्वचनं स्मरन्ति। श्रीनारदमुनिः स्वस्य साधकलीलावस्थाया अनुभवख्यापनमिषेण सूचयति-

**नामान्यनन्तस्य हतत्रपः पठन्गुह्यानि भद्राणि कृतानि च स्मरन्।**

**गां पर्यटंस्तुष्टमना गतस्पृहः कालः प्रतीक्षन्विमदो विमत्सरः।।**

(भा.पु.1.6.27)

लज्जां परित्यज्य श्रीकृष्णस्य नामावलिमनुक्षणमुच्चारयन् तस्य प्रेयसीप्रभृतिभिः सह तदीयप्रेमपरिपाटीमयं सुगोप्यं सर्वोत्तमं लीलासमूहं कस्मैचिदप्यप्रकाश्य स्वाधिकारानुसारं स्मरन् समस्तवासनात्यागपूर्वकं निरहङ्कारतया निर्मत्सरतया च पृथिवीं पर्यटन् सन्तुष्टचित्तेन केवलं भगवतः कृपावसरस्य प्रतीक्षामकरवम् इति नारदोक्तिः प्रणिधेया। पुनः स ब्रवीति–**प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः। आहूत इव मे शीघ्रं दर्शनं याति चेतसि।** (भा.पु.1.6.34) निजनामश्रवणप्रियो भगवान् स्वनामगानस्थलेषूपस्थितो भवति। तस्याऽऽगमनेन तत्स्थानं तीर्थत्वेन परिणमते। स प्रभुः संकीर्त्तनवेलायां समाहूत इव समकालमेव हृदये स्थितो दर्शनं ददातीति। श्रीमद्भागवतपुराणे भीष्मदेवस्य निर्याणादव्यवहितपूर्वं स्वमुखेन भगवन्नाममहिमा प्रकाशितः। स यथा–**भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्त्तयेत्। त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः।।** (भा.पु.1.9.23) **स देवदेवो भगवान्प्रतीक्षतां कलेवरं**



**यावदिदं हिनोम्यहम्। प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्यान-पथश्चतुर्भुजः।।** (भा.पु.1.9.24)

न केवलमेतद् भीष्मस्याऽन्त्येष्टिक्रियासमापनादनन्तरं समुपस्थिताः समे प्रेक्षाकारिणो भगवन्तं गोविन्दादिभिर्नामभिः स्तुतवन्तः–

**तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः।**

**ततस्ते कृष्णहृदयाः स्वाश्रमान् प्रययुः पुनः।।** (भा.पु.1.9.47)

शुकपरीक्षित्संवादक्रमेण एकदा श्रीशुकमुनिः श्रीनामसंकीर्त्तनस्य पूर्वाचार्यनिर्णीतसिद्धान्तान् व्यक्तीकृतवान्। ते भवन्तीत्थम्-सिद्धो भवतु साधको वा भवतु उभयोर्निमित्तं श्रीहरिनाम्नामनुकीर्त्तनं विना नास्तीतरं ध्येयं परममङ्गलकरम्। नामसंकीर्त्तनं भवति स्वर्गाभिलाषिणां मोक्षाभिलाषिणां च निखिलानामात्मारामाणामेकान्त-भक्तानां निजनिजभक्त्यनुरूपदेशकालपात्रोपकरणादीनां शुद्ध्यशुद्धिभयरहितं परममङ्गलकारकमिति।

**एतान्निर्विद्यमानानामिच्छतामकुतोभयम् ।**

**योगिनां नृप निर्णीतं हरेर्नामानुकीर्त्तनम्।।** (भा.पु.2.1.11)

व्यतिरेकालङ्कारेण शोभिता अधःस्था शौनकोक्तिः नितरां प्रणिधेया। सा चेत्थम्–

**श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः।**

**न यत्कर्णपथोपेतो जातु नाम गदाग्रजः।।** (भा.पु.2.3.19)

यस्य कर्णकुहरे कदापि श्रीकृष्णनाम न प्रविष्टं स मनुष्यः नूनं श्वग्राम्यशूकरोष्ट्रगर्दभतुल्यः पशुरेव निरूपितोऽस्ति। तथैव श्रीहरिनामग्रहणेनापि यस्य हृदये प्रमोदोदयो न भवति तद्हृदयमपराधकठिनं पाषाणसममिति श्रीशौनकस्य विचारः।

**तदश्मसारं हृदयं वतेदं यद्गृह्यमाणैर्हरिनामधेयैः।**

**न विक्रियेताथ यदा विकारो नेत्रे जलं ग्रामरुहेषु हर्षः।।** (भा.पु.2.3.24)

अहो श्रीहरेर्नामसमूहग्रहणेनाऽपि यच्चित्तमार्द्रं न भवति फलतः शरीरे रोमाञ्चो न जायते चक्षुर्भ्यां लोतकवारि न निःसरति तद्हृदयं पाषाणकठिनमिति वक्तुं नितरां युज्यते। सकलान्येतानि लक्षणानि परमवैष्णवस्य श्रीचैतन्यस्य जीवने सम्यक्प्रति-फलितानि। कविकर्णपूरग्रथिते बङ्गभाषायां रचिते श्रीचैतन्यचरितमहाकाव्ये इतरचरितग्रन्थेषु च श्रीचैतन्यमहाप्रभुकर्त्तृकहरेकृष्णमहामन्त्रस्य कीर्त्तनावसरे तदीयकृष्णैकप्राणतायाः

विभुप्रेमविभोरतायाः प्रदत्ता छविः पूर्वोक्तं प्रमाणयति। क्षौरकर्मवेलायां नापितमपि उच्चस्वरेण मुहुर्मुहुः 'हरे कृष्ण' इत्यादिमहामन्त्रोच्चारणाय प्रेरयन्स्वयं रोमाञ्चितदेहो निरतिशयदुःखविदलितः क्रन्दनं कुर्वन्क्षौरकर्मणि पुनः प्रवृत्तो जात इति तथ्यं विदितमस्ति।

ततः श्रीगौराङ्गः समवददतीव प्रमुदितो हरे कृष्णेत्युच्चैर्वद मुहुरिति श्रीमयतनुः।
ततोऽसौ तत्राप्य प्रतिवलितरोमाञ्चललितो रुदंस्तत्तं कर्ममरभतबहुदुःखैर्विदलितः।।
(श्रीचैतन्यचरितमहाकाव्यम् 11.14)

अनेन दृष्टान्तेन श्रीगौरहरिः क्षौरकर्मादिसमयेऽपि हरेकृष्णमहामन्त्रस्य उच्चाङ्गकीर्त्तनस्य विधेयतां प्रचारितवान्। सोऽपि 'खाइते शुइते', 'सर्वकार्ये सर्वक्षणं' महामन्त्रग्रहणायोपदिशति। श्रीनीलाचलधाम्नि श्रीकृष्णमोहाविष्टस्य श्रीचैतन्यस्य भक्तिविकाराणां विवरणं तच्चरितग्रन्थप्रणेतृभिः प्रदत्तम्। तद्यथा–

**सर्व अङ्ग श्रीमस्तक शोभित चन्दने। निरवधि हरेकृष्ण बोले श्रीवदने।।**
**सर्वरात्रिरे सिन्धुतीरे परम विरले। कीर्त्तन करेन प्रभु महा कुतूहले।।**
**ताण्डव पण्डित प्रभु निज प्रेमरसे। करेन ताण्डव भक्तगणे सुखे भाषे।।**
**रोमहर्ष अश्रु कम्प हुँकार गर्जन। स्वेद बहुविध वर्ण हय क्षण क्षण।।**
**यत भक्ति विकार सकल एके वारे। परिपूर्ण हय आसि प्रभुर शरीरे।।**
(चैतन्य भागवत 3.3.206)

श्रीनीलाचलात्प्रत्यावृत्य नवद्वीपास्थानकाले निरन्तरमुच्चस्वरेण हरेकृष्णमहामन्त्रस्य तत्कर्तृककीर्त्तनविषयोऽपरेण प्रत्यक्षदर्शिना श्रीमुरारिगुप्तेनापि वर्णितः–

**गृहे वसन्प्रेमविभिन्नधैर्यं रुदत्यलं रौति मुहुर्महुः स्वनैः।**
**सवेपथुर्गद्गदया गिरा लपत्यलं हरे कृष्ण हरे मुदा क्वचित्।।**
(श्रीकृष्णचेतन्यचरितामृतम् 1.16.12)

शुकपरीक्षित्सम्वादक्रमेण शुकमुनिः मृगशरीरधारिणो राजर्षिभरतस्य शरीरत्यागसमये भगवतो विष्णोरुच्चस्वरेण विहितं कीर्त्तनं स्मृतवान्।

**यज्ञाय धर्मपतये विधिनैपुण्याय योगाय सांख्यशिरसे प्रकृतीश्वराय।**
**नारायणाय हरये नम इत्युदारं हास्यन्मृगत्वमपि यः समुदाजहार।।**
(भा.पु. 5.14.45)

श्लोकेऽस्मिन्नृषिभरतः कर्मयोगज्ञानमार्गेषु भगवन्नाम्नामुत्तरोत्तरस्योत्कर्षप्रतिपादनपूर्वकमुच्चस्वरेण कीर्त्तितवानिति विवक्षा। पापिनोऽजामिलस्य मोचनप्रसङ्गे चतुरक्षरस्य



'नारायण' इत्यस्योच्चारणेन सकलपापविनाशनस्य महिमा सर्वेषां विदितोऽस्ति। उच्यते-

**स्तेनः सुरापो मित्रध्रुग् ब्रह्महा गुरुतल्पगः। स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे।।**
**सर्वेषामप्यङ्गवतामिदमेव सुनिष्कृतम्। नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः।।**
**न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुध्यत्यघवान्व्रतादिभिः।**
**यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भजम्।।** (भा.पु.6.2.11)

मरणकाले नामोदयेन नामापराधो नास्तीति वैष्णवीयमान्यता। मृत्युसमये भवन्नाम यदि मुखे नायाति तर्हि नामापराधोऽस्तीति गम्यते। एवमपि स्वीक्रियते यत्संकेतेन परिहासेन कथागीतालापादिहेतुनाऽऽहारविहारनिद्रादिभियेन केनापि व्याजेन नामग्रहणमपि सर्वपापनाशाय भवति। श्रीमद्भागवतस्य प्रसिद्धः स श्लकोऽस्ति–

**सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।**
**वैकुण्ठनामग्रहणमशेषाघहरं विदुः।।** (भा.पु.6.2.14)

## 6. उच्चाङ्गहरिनामसंकीर्त्तनस्य भागवतीयप्रामाणिकता

**यन्नाम गृह्णन्निखिलान् श्रोतॄनात्मानमेव च।**
**सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते।।** (भा.पु.10.34.17)

**एतावतालमघनिर्हरणाय पुंसां संकीर्त्तनं भगवतो गुणकर्मनाम्नाम्।**
**विक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तम्।।**
(भा.पु. 6.3.24)

श्रीशुक्राचार्यः वामनदेवं प्रति नामानुकीर्त्तनस्य महिमानं निगदति यथा–

**मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः। सर्वं करोतिनिश्छिद्रं नामसंकीर्त्तनं तव।।**
(भा.पु. 8.23.16)

स्वरादिभ्रंशजनितमन्त्रगताः क्रमविपर्ययादिहेतुकास्तन्त्रगतास्तथा देशकाल-पात्रदक्षिणादिवस्तुगताः समस्तन्यूनताः केवलं नामानुकीर्त्तनेन निर्दुष्टतां प्रयन्ति। वैष्णवसाहित्यकृतिष्वयं प्रसङ्गो बहुधाऽऽलोचितः, यथा–

**चैतन्यभागवते जपकर्त्ता हैते उच्च संकीर्त्तनकारी। शतगुण अधिक से पुराणेते धारि।।**
**उच्च करि करिले गोविन्द संकीर्त्तन। जन्तुमात्र शुनियाइ पाय विमोचन।।**
(चैतन्य भागवत 1.16.268)

नामाचार्यश्रीहरिदासठक्कुरस्य पूर्वोक्तवचनादिदं सिध्यति यन्महामन्त्रस्य जपापेक्षया

उच्चसंकीर्त्तनस्य श्रेयस्त्वं सुतरां सिध्यति। दीक्षामन्त्रस्य मानसजपः समीचीनोऽस्ति। किन्तु महामन्त्रस्याऽसंख्यातोच्चसंकीर्त्तनं हि श्रेष्ठम्। श्रीचैतन्यमङ्गलाख्ये ग्रन्थे (मध्यखण्डे) उद्धृता श्रीचैतन्योक्तिः प्रसङ्गेऽस्मिन्प्रामाणिकतामावहति–

**हासिया कहिल प्रभु भक्त सभाकारे। एइ मोर हरिनाम देह घरे घरे। नवद्वीपे बाल वृद्ध वैसे यत जन। चण्डाल दुर्गति आर सज्जन दुर्ज्जन।।**

अत्र निर्दिष्टग्रन्थशब्दः द्वात्रिंशद्वर्णनिर्मितः रचनाविशेष इति हेमचन्द्रः शब्दकल्पद्रुमे प्रमाणयति। श्रीचैतन्यचरितामृतेऽस्य प्रसङ्गस्य सिद्धान्तरूपेणेदमुच्यते–**नाम बिनु कलिकाले नाहि आर धर्म। सर्वमन्त्रसार नाम एइ शास्त्र मर्म।। एत वलि एक श्लोक शिखाइल मोरे। कण्ठे करि एइ श्लोक करिह विचारे।। हरेर्नाम हरेर्नाम हरेर्नामैव केवलम्। कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा।।** कलिकाले श्रीकृष्णचैतन्य इति प्रख्यातस्य श्रीचैतन्यस्य हरिनाम-महामन्त्रोपदेशं स्मरन्श्रीवासुदेवसार्वभौमभट्टाचार्येणाच्यते– **विषण्णचित्तान्कलिघोरभीतान्संवीक्ष्य गौरो हरिनाममन्त्रम्। स्वयं ददौ भक्तजनान्समादिशत्संकीर्त्तयध्वं ननु नृत्यवाद्यैः।। हरेर्नामप्रसादेन निस्तरेत्पातकी जनः। उपदेष्टा स्वयं कृष्णचैतन्ये जगदीश्वरः।। कृष्णचैतन्यदेवेन हरिनाम प्रकाशितम्। येन केनापि तत्प्राप्तं धन्योऽसौ लोकपावनः।। अत एव कलियुगे नामयज्ञसार। आर कोन धर्म कैले नाहि हय पार।। रात्रि दिने नाम लय खाइते शुइते। ताहार महिमा वेदे नाहि पारे दिते।।** (चै.भा.1.14.139–40)

### उपसंहारः

श्रीमद्भागवतमहापुराणं विष्णुभक्तिसिद्धान्तस्य प्रामाणिकग्रन्थोऽस्ति। अचिन्त्यभेदाभेदर्शनस्याऽन्यतमप्रमुख आचार्यः श्रीचैतन्महाप्रभुः हरेकृष्णमहामन्त्रसंकीर्त्तनस्य परमप्रवर्तकरूपेण गौडीयवैष्णधर्मपरम्परायाः सार्वजनीनीकरणे सुमहतीं भूमिकां निर्वोढवान्। **तृणादपि सुनीचेन तरोरपि सहिष्णुना। अमानिना मानदेन कीर्त्तनीयः सदा हरिः।।**

(श्रीचैतन्यप्रणीतशिक्षाष्टके श्लोकः 3)

इति स्वरचितशिक्षाष्टकस्याऽभिधेयो न केवलं तदीयहरिनामसंकीर्त्तनस्य सिद्धान्तं व्याख्याति अपि च स्वाचरणसिद्धिमपि वक्ति।

❖



# क्तप्रत्ययविमर्शः

डॉ. भगवतशरणशुक्लः

व्याकरणपारिभाषिकशब्देषु प्रत्ययशब्दोऽतीव महत्त्वपूर्णो विद्यते। तत्र प्रत्ययत्वं नाम किमिति जिज्ञासायां महाभाष्यकारः प्रत्ययः(3.1.1) इति सूत्रे कथयति–

“प्रत्यय इति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः कुत एतत् लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनम् अन्वर्थसंज्ञा यथा विज्ञायेत–प्रत्याययतीति प्रत्ययः। यदि प्रत्याययतीति प्रत्ययोऽविकारादीनां प्रत्ययसंज्ञा न प्राप्नोति न हि ते किञ्चित् प्रत्याययन्ति। एवं तर्हि प्रत्याय्यते इति प्रत्ययः।”[1]

नागेशभट्टश्च पूर्वोक्तभाष्यानुसारेणैव **प्रत्यय इति महासंज्ञया स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकस्यैव तत्संज्ञकत्वात्** इति कथनेन स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकत्वं प्रत्ययत्वमिति प्रत्ययलक्षणं स्वीकृतवान्। तत्र प्रत्ययशब्दः कर्तृसाधनः प्रत्याययति प्रकृत्यर्थमित्येवंरूपः स्वार्थबोधकः, प्रकृत्या प्रत्याय्यते बोध्यते इति कर्मसाधनः स्वार्थिकप्रत्ययबोधकश्च बोध्यते। एते च सर्वे प्रत्ययाः पाणिनिकृताष्टाध्यायीग्रन्थे तृतीयचतुर्थपञ्चमाध्याये कथिताः सन्ति। अतः प्रत्यय इत्यस्य महाभाष्यप्रदीपोद्द्योतशब्देन्दुशेखरादिव्याख्यानमादाय स्वरूपबोधकरूपेतरव्यावर्तकरूपविशेषणयुक्तमिदं लक्षणं वक्तुं शक्यते– **अष्टाध्यायीतृतीयचतुर्थपञ्चमाध्यायस्थसूत्रविहितत्वे सति आगमादेशभिन्नत्वे सति स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकत्वं प्रत्ययत्वम्।**

यद्यपि लक्षणेऽत्र भाष्यव्याख्यानुसारेण आगमादेशभिन्नत्वमिति सत्यन्तं पदमदेयमस्ति, तेषामर्थशून्यत्वात्, तथापि यथाकथञ्चित् तेषां प्रकृत्यर्थ एवार्थ इति स्वीकारेऽपि दोषो न स्यादिति धिया तदपि विशेषणं विहितम्।

प्रत्ययास्तावत् धातोः प्रातिपादिकाच्च विहिताः भवन्ति। एते प्रत्ययाः यथा लक्षणे उक्तमष्टाध्यायीग्रन्थस्य तृतीये चतुर्थे पञ्चमे चाध्याये **प्रत्ययाः** 3.1.1 इति सूत्राधिकारे विहिताः। तत्र यद्यपि **धातोः** 3.1.91 इति सूत्रस्याधिकारात् प्रागपि

प्रत्ययाः कथिताः। न च तत्र धातोः अधिकाराभावात् सामान्येन धातुपदग्रहणम्,
तथापि **गुप्तिज्किद्भ्यः सन्** 3.1.5, मान्बधदानशान्भ्यो दीर्घश्चाभ्यासस्य 3.1.6
इति सूत्रद्वये धातुविशेषस्य उल्लेखात् **धातोः कर्मणः समानकर्तृकादिच्छायां वा**
3.1.7 इत्यत्र च धातोः कथनात् एतैः विहिताः प्रत्ययाः धातोः भवन्ति। **सुप आत्मनः क्यच्** 3.1.8 इति सूत्रात् **मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्र-हलकलकृततूस्तेभ्यो णिच्** 3.1.20 इति यावत् एतैः विहितानां प्रत्ययानां प्रकृतिः
सुबन्तं भवति। तदनन्तरं **धातोरेकाचो हलादेः क्रियासमभिहारे यङ्** 3.1.22
इति सूत्रात् धातोः इत्यस्यानुवृत्तिः **कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च**
3.1.90 इति सूत्रं यावत् भवति। तेन एतेषु मध्ये आगतानि सूत्राणि धातोरेव प्रत्ययं
विदधति। चतुर्थेऽध्याये पञ्चमेऽध्याये च **ङ्याप्प्रातिपदिकात्** 4.1.1 इति
सूत्रस्याधिकारात् सर्वे प्रत्ययाः ङ्यन्तात् आबन्तात् प्रातिपदिकाच्च भवन्ति। तत्र
स्त्रीप्रत्ययाः **स्त्रियाम्** 4.1.3 इत्यधिकारस्थसूत्रविहिताः प्रातिपदिकादेव भवन्ति।
तत्र ङ्यापो अधिकारो न प्रवर्त्तते, इहैव तयोः विधानात्। पूर्वं तयोरज्ञानाच्च **तद्धिता**
4.1.76 इत्यधिकारः पञ्चमाध्यायं यावत्। तत्र विहिताः प्रत्ययाः ङ्यन्तात्
आबन्तात्प्रतिपादिकाच्च भवन्ति। केचित्तु सुबन्तात् तद्धितोत्पत्तिरिति स्वीकुर्वन्ति।

प्रत्ययास्तावत् नवविधाः सन्ति। 1. धातुप्रत्ययाः (धातुसंज्ञोद्देश्याः प्रत्ययाः। ते
च द्विविधाः–धातुविहिताः, सुबन्तविहिताश्च) 2. विकरणप्रत्ययाः (तिङ्परे धातुविहिताः)
3. कृत्यप्रत्ययाः (कृत्याः 3.1.95 इत्यधिकारे विहिताः "चित्याग्निचित्ये च" 3.1.132
इति यावत्) 4. कृत्प्रत्ययाः, 5. तिङ्प्रत्ययाः, 6. सुप्प्रत्ययाः, 7. स्त्रीप्रत्ययाः, 8.
तद्धितप्रत्ययाः, 9. समासान्तप्रत्ययाः (समासान्ताः 5.4.68 इत्यधिकारे विहिताः)।

कृत्प्रत्ययेषु यद्यपि सर्वे प्रत्ययाः महत्त्वपूर्णाः तथापि प्रयोगदृष्ट्या अर्थबाहुल्यदृष्ट्या
च 'क्त'-प्रत्ययमहत्त्वं सर्वाधिकमस्ति। एतस्य क्तप्रत्ययस्य **क्तक्तवतू निष्ठा** 1.1.25
इति सूत्रेण निष्ठा-संज्ञा भवति। क्तप्रत्ययत्वं नाम कारककालविशेषार्थप्रत्यायकत्वे
सति ककारानुबन्धसंवलिततकारोत्तरह्रस्वाकारानुपूर्वीमत्त्वम्।

क्तप्रत्ययः धातोः 3.1.91 इत्यस्य भूते 3.2.84 इत्यस्य चाधिकारे पठितः।
तेन सामान्यतया धातोः भूतकाले विधीयते। तयोरेव कृत्यक्तखलर्थाः 3.4.7 इति
सूत्रनियमनात् सकर्मकधातुभ्यः कर्मणि, अकर्मकधातुभ्यश्च भावेऽर्थे विधीयते।
क्तप्रत्ययविधायकानि अनेकानि सूत्राणि सन्ति। तेषां विवरणम् इत्थं वर्त्तते।



1. **निष्ठा** 3.2.102 इदं सूत्रं सर्वेभ्यो धातुभ्योः भूतकाले सकर्मकेभ्यः
कर्मणि अर्थे अकर्मकेभ्यो भावेऽर्थे च क्तप्रत्ययं विदधाति। तेन पठितम्, लिखितम्,
भूतम्, एधितम् इत्यादिप्रयोगाः सिध्यन्ति।

2. **ञीतः क्तः** 3.2.187 येषु धातुषु "ञि" इति धातुघटकोऽनुबन्धो वर्त्तते तेभ्यो
वर्त्तमानकाले क्तप्रत्ययो भवति। यद्यप्यत्रापि "भूते" 3.2.84 इति
सूत्राधिकारादनुवर्त्तमानः प्रतीयते, तथापि भाष्यव्याख्यानात् लक्ष्यानुरोधात् च मण्डूक-
प्लुतिन्यायेनात्र **वर्तमाने लट्** 3.2.123 इत्यस्मात् वर्तमाने इति पदमनुवर्त्तते। अत
इदं सूत्रं वर्त्तमानकाले, भावे, कर्मणि च 'क्त' प्रत्ययं विदधाति। 'ञि' इत्यनुबन्धविशिष्टाः
धातवः भ्वादिगणे 'ञि फला विशरणे', 'ञि मिदा स्नेहने', 'ञि ष्विदा स्नेहनमोचनयोः'
'ञि क्ष्विदा स्नेहनमोचनयोः', 'ञि त्वरा सम्भ्रमे', 'ञि ष्वद अव्यक्ते शब्दे' इत्येवं सप्त
धातवः सन्ति। अदादिगणे 'ञि ष्वप् शये' इत्येकः, जुहोत्यादिगणे 'ञि भी भये' इत्येकः,
दिवादिगणे 'ञि ष्विदा गात्रप्रक्षरणे', 'ञि तृषा पिपासायां', 'ञि मिदा स्नेहने', 'ञि क्ष्विदा
स्नेहनमोचनयोः' इति चत्वारो धातवः सन्ति। स्वादिगणे 'ञि धृषा प्रागल्भे' इत्येको
रुधादिगणे 'ञि इन्धी दीप्तौ' इत्यपरो धातुरस्ति।

3. **मतिबुद्धिपूजार्थेभ्यश्च** 3.2.188 सूत्रेऽस्मिन् समानार्थकयोर्मतिबुद्धिशब्दयोः
ग्रहणात् मतिशब्दः इच्छार्थको विद्यते। तस्माद् इच्छार्थकाद् वुद्ध्यर्थकाद् पूजार्थकात्
धातोः वर्तमानकाले भावे कर्मणि चार्थे क्तप्रत्ययो विधीयतेऽनेन सूत्रेण। तेन राज्ञां
मतः बुद्धः पूजितः वेत्येवंभूताः प्रयोगाः सिध्यन्ति।

4. **नपुंसके भावे क्तः** 3.3.114 कालसामान्यक्रियावृत्तेरकर्मकाद् धातोः
नपुंसकत्वविशिष्टभावेऽर्थे क्तप्रत्ययो भवति इति सूत्रार्थः। तेन जल्पितं दूषितं शयितम्
इत्यादिप्रयोगाः सिध्यन्ति। अत्र अधिकाराभावात् वर्तमाने न सम्बद्ध्यते। अतः
कालसामान्ये भावेऽर्थे अन्यसूत्रेण प्राप्त्यभावादनेन क्तप्रत्ययः क्रियते।

5. **क्तिच्क्तौ च संज्ञायाम्** 3.3.174 सूत्रमिदं समुदायेन चेत् संज्ञा गम्यते
तदा धातोः आशिषि अर्थे क्तिच्- प्रत्ययं क्तप्रत्ययं च विदधाति। एतस्मिन् सूत्रे भाष्यं
नास्ति। काशिकाकारः तनुतात् तन्तिः, सनुतात् सन्तिः इत्येवं क्तिच्-प्रत्ययस्योदाहरण-
माह। क्तप्रत्ययस्य च देवा एनं देयासुः देवदत्तः इत्युदाहरणमाह। अत्र देवपूर्वकदाधातोः
क्तप्रत्ययस्य आशिष्यर्थे अनेन सूत्रेण विधाने सति देवदत्तः प्रयोगः सिध्यति। यद्यपि
क्तप्रत्ययः **निष्ठा** 3.2.102 इत्यनेन बोधितः, तथापि क्तिच्-प्रत्ययेन क्तप्रत्ययस्य

बाधा न भवेत् एतदर्थमेव पुनः शास्त्रकारः सूत्रेऽस्मिन् क्त-प्रत्ययमाह।

6. **आदिकर्मणि क्तः कर्त्तरि च** 3.4.71 सूत्रम् आदिकर्मणि अर्थे कर्त्तरि कर्मणि भावे चार्थे क्तप्रत्ययं विदधाति। तेन प्रस्वेदितश्चैत्रः प्रमेदितः प्रक्ष्वेदितः इत्यादिप्रयोगाः सिध्यन्ति। आदिकर्मशब्दवाच्यार्थः कः इति। जिज्ञासायां शब्दकौस्तुभकारः लिखति- **आदिभूतो यः क्रियाक्षणः अपवृक्तः तस्मिन्नेव अवयवे समूहरूपारोपात् सिद्धः प्रत्ययः**[2] इति। बालमोनरमाकारश्चास्य सम्यगर्थमाह-**दीर्घकालव्यासक्तायाः कटाद्युत्पादनक्रियायाः आरम्भकालविशिष्टोंऽशः आदिकर्म**[3] इति।

आदि च तत् कर्म इति आदिकर्म। कर्मशब्दोऽत्र क्रियावाची। आदिशब्दः आरम्भकालवाची अधिककालसाध्या या क्रिया तस्याः यः प्रारम्भांशः स एव आदिकर्मपदेन उच्यते इति बोध्यम्।

7. **"आदिकर्मणि निष्ठा वक्तव्या"** इति वार्त्तिकं तु आदिकर्मणि भावकर्मणोः धातोः क्तप्रत्ययं क्तवतुप्रत्ययं च विदधाति। किन्तु **आदिकर्मणि क्तः कर्त्तरि च** 3.4.71 इति सूत्रम् आदिकर्मणि एतस्मिन्नर्थे कर्त्तरि मुख्यतः, चकारात् कर्मणि भावे च भूतकाले वर्त्तमानाद्धातोः क्तप्रत्ययं विदधाति।

8. **गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च** 3.4.72 गत्यर्थक-धातुभ्योऽकर्मकेभ्यो धातुभ्यः श्लिषप्रभृतिभ्यश्च धातुभ्यो भूतकाले कर्त्तरि भावे कर्मणि च क्तप्रत्ययो भवतीति सूत्रार्थः। तेन गङ्गां गतः, गङ्गां प्राप्तः, स म्लानः, लक्ष्मीमाश्लिष्टः शेषमधिशयितः, वैकुण्ठमधिष्ठितः, शिवमुपासितः, हरिदिनमुपोषितः, राममनुजातः, गरुडमारूढः, विश्वमनुजीर्णः इत्येते प्रयोगाः सिद्ध्यन्ति। भावे कर्मणि च विधाने गङ्गा प्राप्ता, गङ्गा गता इत्यादयोऽपि प्रयोगाः भवन्ति।

यद्यपि एतस्य सूत्रस्यानन्तरं **दाशगोघ्नौ सम्प्रदाने** 3.4.73, **भीमादयोऽपादाने** 3.4.74 **ताभ्यामन्यत्रोणादयः** 3.4.75 एतानि सूत्राणि क्त-प्रकरणमध्ये पठितानि सन्ति तथापि एतेभ्योऽनन्तरं **क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेषु** 3.4.76 इत्यत्र क्तप्रत्ययग्रहणाद् ज्ञायते यत् एतेषु सूत्रेषु क्तप्रत्ययस्य सम्बन्धो नास्ति। अन्यथा **आदि कर्मणि क्तः कर्त्तरि च** 3.4.71 इत्यस्मादनुवर्तमानः क्तप्रत्ययः सर्वत्रानुवृत्तः स्यात्, **क्तोऽधिकरणे च** इत्यादिसूत्रे क्तप्रत्ययकथनं व्यर्थं स्यात्। **क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेषु** 3.4.76 सूत्रमिदं ध्रौव्यार्थे (स्थैर्यार्थे) गत्यर्थे भक्षणार्थे च ये धातवस्तेभ्योऽधिकरणेऽर्थे क्त-प्रत्ययं विदधाति। तेन मुकुन्दस्य



आसितम्, रमापतेः गतम्, रमापतेः भक्षितम् इत्यादयः प्रयोगाः सिध्यन्ति। अधिकरणार्थकक्तप्रत्ययान्तयोगे अधिकरणवाचिनश्च 2.3.68 इति सूत्रेण तस्मात् प्रातिपदिकात् षष्ठी विभक्तिर्भवति। अनेन सूत्रेण चकाराद् भावे कर्मणि चार्थेऽपि क्तप्रत्ययो भवति।

**क्तप्रत्ययस्य आदेशाः**-धातुभ्यो विहितः क्तप्रत्ययः अनुबन्धलोपे सति न सर्वत्र 'त' इत्येवं रूपेण तिष्ठति। बहुषु स्थलेषु भिन्नं भिन्नं स्वरूपम् आदेशरूपं लभते। तस्य स्थाने आदेशविधायकानि पञ्चदश सूत्राणि सन्ति। येषां विवरणं संक्षेपेण इत्थमस्ति-

1. **रदाभ्यां निष्ठातो नः पूर्वस्य च दः** 8.2.42 सूत्रमिदं रेफदकाराभ्यां परयोः क्तक्तवतुप्रत्यययोः तकारस्य स्थाने, अथ चैतत्प्रत्ययाव्यवहितपूर्वत्वविशिष्ट-धातुतकारस्य स्थाने च नकारादेशं विदधाति। तेन छिन्नः भिन्नः इति छिद् भिद् धातुद्वयस्य, शॄ हिंसायां धातोश्च शीर्णः इति रूपं सिध्यति। तथैव क्तवतु इति प्रत्यये सति छिन्नवान् भिन्नवान् शीर्णवान् इति प्रयोगाः सिध्यन्ति।

**संयोगादेरातो धातोर्यण्वतः** 8.2.43 सूत्रमिदं संयोगादेः यण्वतः आकारान्ताद्धातोः विहितयोः क्तक्तवतुप्रत्यययोः तकारस्य स्थाने नकारादेशं विदधाति। तेन द्रा स्त्यै म्लै ग्लै प्रभृतिभ्यो धातुभ्यो निष्ठाप्रत्ययविधाने सति अनेन सूत्रेण तकारस्य नकारे कृते सति द्राणः, द्राणवान्, स्त्यानः, म्लानः, म्लानवान्, ग्लानः, ग्लानवान् इत्येवम्भूताः प्रयोगाः सिध्यन्ति।

एते द्वे सूत्रे क्तादेशविधायके प्रायः समान्ये सूत्रे स्तः। अन्यानि च विशिष्टादेश-विधायकानि सन्ति। तेषां विवरणं संक्षेपेणेत्थमस्ति- ल्वादिगणपठितधातुभ्यो विहितक्तप्रत्ययस्य स्थाने नकारविधायकं **ल्वादिभ्यः** 8.2.44 इति सूत्रमस्ति। येन लूनः, लूनवान् प्रभृतयः प्रयोगाः सिध्यन्ति। तथैव ओदिद्धातुभ्यः ओ भुजी, टु ओ श्वि, ओ हाक् प्रभृतिभ्यो विहितक्तप्रत्ययस्य नकारविधानाय **ओदितश्च** 8.2.45 इति सूत्रमस्ति। येन भुग्नः, भुग्नवान्, उच्छूनः उच्छूनवान् इत्यादि प्रयोगाः सिध्यन्ति। इत्थमेव अस्पर्शेऽर्थे श्यैङ्धातोः अनपादानेऽर्थे अञ्चधातोः, अविजिगीषार्थे दिव् धातोः अवातेऽर्थे निर् पूर्वात् वा धातोश्च विहितयोः क्त-क्तवतु-प्रत्यययोः तकारस्य स्थाने क्रमशः **श्योऽस्पर्शे** 8.2.47 **अञ्चोऽनपादाने** 8.2.48 **दिवोऽविजिगीषायाम्** 8.2.49 **निर्वाणोऽवाते** 8.2.50 इति सूत्राणि नकारादेशं कुर्वन्ति। येन शीनं

शीनवान्, समक्नः, समक्नवान्, द्यूनः, द्यूनवान्, निर्वाणः निर्वाणवान् इत्यादि प्रयोगाः सिध्यन्ति। एवमेव शुष्, पच्, क्षै, प्रपूर्वक स्त्यै इति धातुभ्यो विहितयोः क्त-क्तवतुप्रत्यययोः तकारस्य स्थाने क्रमशः क व म इत्यादेशानां **शुषः कः** 8.2.51, **पचो वः** 8.2.52 **क्षायो मः** 8.2.53, **प्रस्त्योऽन्यतरस्याम्** 8.2.54 इति सूत्रैः विधानेन क्रमशः शुष्कः, शुष्कवान्, पक्वं, पक्ववान्, क्षामः, क्षामवान्, प्रस्तीमः, प्रस्तीमवान् एते प्रयोगाः सिध्यन्ति। एवमेव **अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः** 8.2.55 इति सूत्रेण अनुपसर्गेभ्यः फल-क्षीब्-कश-धातुभ्यः उत् पूर्वकल्लाघधातोश्च विहित-क्तक्तवतुतकारस्य स्थाने क्रमशः लकारे सति फुल्लम् फुल्लवान्, क्षीब् इत्यत्र लकार लोपे क्षीबः क्षीबवान् इति, कृशधातोः उत्पूर्वकलाघधातोश्चापि क्ततकारलोपे सति कृशः, कृशवान्, उल्लाघः, उल्लाघवान् इति प्रयोगाः सिध्यन्ति। उपसर्गविशिष्टेभ्यः एतेभ्यो न लकारस्य विधानं तकारलोपश्च भवतः। एवमेव नुदविदोन्दजाघ्राह्रीभ्योऽ-न्यतरस्याम् 8.2.56 इति सूत्रं नुद प्रेरणे, विद विचारणे, उन्दी क्लेदने, त्रैङ् पालने, घ्रा घ्राणे, ह्री लज्जायाम् एतेभ्यो धातुभ्यो विहितक्त-क्तवतुप्रत्यययोः तकारस्य स्थाने विकल्पेन नकारे सति तुन्नः, तुन्नवान्, विन्नः, विन्नवान्, उन्नः, उन्नवान्, त्राणः, त्राणवान्, घ्राणः, घ्राणवान्, ह्रीणः, ह्रीणवान् एते प्रयोगाः सिध्यन्ति। पक्षे तकार एव तिष्ठति। एतेभ्योऽनन्तरं पञ्च सूत्राणि 8.2.61 यावत् निष्ठातकारस्थानिकादेशनिषेधकानि सन्ति। क्षि क्षये धातोः निष्ठाप्रत्यये सति ण्यदर्थभिन्ने स्थले **निष्ठायामण्यदर्थे** 6.4.60 इत्यनेन क्षिधातोः इकारस्य दीर्घे कृते सति **क्षियो दीर्घात्** 8.2.46 इत्यनेन निष्ठातकारस्य नकारे सति क्षीणः, क्षीणवान् इति रूपे निष्पद्येते।

**क्तक्तवतू निष्ठा** 1.1.26 इति सूत्रेण क्त-क्तवतुप्रत्यययोः निष्ठासंज्ञा भवति। क्तवतुप्रत्ययविधायकं **निष्ठा** 3.2.102 इति सूत्रं "आदिकर्मणि निष्ठा वक्तव्या" वार्तिकं च विद्यते। क्तप्रत्ययस्य विधायकानि चानेकानि सूत्राणि सन्ति। तत्र प्रश्न उदेति यत् किं सर्वैः सूत्रैः विहितस्य क्तप्रत्ययस्य निष्ठा-संज्ञा भवति उत कैश्चिद् विहितस्य क्तप्रत्ययस्य निष्ठासंज्ञा भवति। एतस्योत्तरविषये पूर्वं भाष्यकार एव प्रष्टव्यः। भाष्यकारः **क्तक्तवतू निष्ठा** 1.1.26 इति सूत्रे कथयति-
**कारककालविशेषावुपादेयौ। भूते यस्तशब्दः कर्त्तरि कर्मणि भावे चेति।**[4] इति।

एतस्मिन् भाष्ये यद्यपि कैयटो न किञ्चिदुक्तवान् किन्तु नागेशभट्टस्तत्र लिखति- **अन्यस्योत्पन्नस्य निष्ठासंज्ञायाः अभावादिति भावः।**[5]



अत्रैव सूत्रे काशिकायां हरदत्तः कथयति- क्तक्तवतू निष्ठा इति वचनात् अन्यस्य उत्पन्नस्य निष्ठेति संज्ञायाः अभावः = सामर्थ्यम्।[6]

एतस्य हरदत्तवचनस्य समर्थनं न्यासकारोऽपि कृतवान्।[7] अनेन स्पष्टं भवति यत् निष्ठा 3.2.102 इति सूत्रेण विहितयोः "आदिकर्मणि निष्ठा वक्तव्या" इति वार्तिकेन च विहितयोः निष्ठासंज्ञा भवति। अन्यैः विहितस्य क्तप्रत्ययस्य निष्ठासंज्ञा न भवति।

अत्रेदं वक्तव्यम्। भाष्यकारस्य कथनमस्ति यत् "भूते यस्तशब्दः कर्त्तरि कर्मणि भावे च" अर्थात् यः सूत्रैः विहितः क्तप्रत्ययः भूतकाले कर्त्तरि कर्मणि भावे च विद्यते एतस्य निष्ठा संज्ञा भवति, तेन **ञीतः क्त** 3.2.187, **मतिबुद्धिपूजार्थेभ्यश्च** 3.2.188, **नपुंसके भावे क्तः** 3.3.114 इति सूत्रत्रयं विहाय सर्वाणि सूत्राणि भूते कर्त्तरि, कर्मणि, भावे चापि क्तप्रत्ययं विदधति। अर्थात् **निष्ठा** 4.3.2.10 सूत्रं तथास्त्येव **आदि कर्माणि क्तः कर्त्तरि च** 3.4.71, **गत्यर्थाकर्मकश्लिषशीङ्स्थासव-सजनरुहजीर्यतिभ्यश्च**3.4.72, **क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेषु** 3.4.76 इत्येतानि यथा कर्त्तरि अधिकरणे च प्रत्ययं विदधति तथैव चकारात् भावकर्मणोरनुवृत्त्या च भावकर्मणोरर्थयोरपि क्तप्रत्ययं विदधति। अतः एतैर्विहितस्य क्तप्रत्ययस्य निष्ठासंज्ञा भवत्येव अपि च ञीतः क्तः 3.2.187 इति सूत्रविहितस्यापि क्तप्रत्ययस्य निष्ठा संज्ञा भवति। अतएव ञिक्ष्विदा स्नेहनमोचनयोः धातोः क्त-प्रत्यये सति क्ष्विद् त इत्यवस्थायां रदाभ्यां निष्ठातो नः पूर्वस्य च दः 8.2.42 इत्यनेन निष्ठापदेन त इत्यस्य ग्रहणेन नकारादेशे सति क्ष्विण्णः प्रयोगः साधितः।

क्तप्रत्ययान्तप्रयोगस्य योगे वर्तमानात् प्रातिपादिकात् **कर्तृकर्मणोः कृति** 2.4.65 इति सूत्रेण षष्ठी प्राप्नोति। तत्र तस्याः षष्ठ्याः न **लोकाव्ययनिष्ठाखलर्थतृनाम्** 2.4.69 इति सूत्रेण निषेधो भवति। किन्तु वर्तमानकाले यत्र क्तप्रत्ययः तत्र तस्य निषेधस्य बाधः **अधिकरणवाचिनश्च क्तस्य च वर्त्तमाने** 2.4.67 इत्यनेन अधिकरणे क्तप्रत्यये सति 2.4.68 इत्यनेन बाधः षष्ठ्याः भवति। अन्यत्र तु षष्ठी निषिध्यते। **नपुंसके भावे क्तः** 3.3.114 इति विहितक्तप्रत्ययस्य योगेऽपि षष्ठी भवति इति नपुंसके भावे क्तस्य योगे षष्ठ्या उपसंख्यानम्, छात्रस्य हसितमिति[8] भाष्यकारः प्रोक्तवान्। नागेशश्चात्र शेखरे 'इदञ्च प्रतिपदोक्तत्वात् **नपुंसके भावे क्तः** 3.3.114 इति सूत्रविहितक्तान्तयोगे एव। अत एव 'भ्रान्तं देशम्' इत्यादौ गत्यर्थाकर्मकश्लिषः इत्यनेन क्ते नानेन षष्ठी[9] इत्याह।

यद्यपि क्तप्रत्ययः वलादिः तेन तस्मिन् परे सर्वेभ्यो धातुभ्यः **आर्धधातुकस्येड्**

वलादेः इत्यनेन इडागमस्य प्राप्तिः भवति किन्तु अनिड्धातुषु तु एकाच उपदेशेऽनुदात्तात् 7.2.10 इत्यनेन निषेधात् न इडागमः। सेड्धातुषु निष्ठायां **श्वीदितो निष्ठायाम्** 7.2.14 इत्यारभ्य **णेरध्ययने वृत्तम्** 7.2.26 इति यावत् पठितसूत्रैः नित्यमिड् निषिध्यते। **वा दान्तशातपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः** 7.2.27 इत्यारभ्य **अपचितश्च** 7.2.30 इति यावत्पठितसूत्रैः विकल्पेन इडागमो निषिध्यते। पुनश्च **इण्निष्ठायाम्** 7.2.47 **क्लिशः क्त्वानिष्ठयोः** 7.2.50 **पूङश्च** 7.2.51 **वसतिक्षुधोरिट्** 7.2.52 **अञ्चेः पूजायाम्** 7.2.53 **लुभो विमोहने** 7.2.54 एतानि सूत्राणि तत्तद्- धातुभ्योऽपि क्त्वाप्रत्यये क्तप्रत्यये च परे इडागमं विदधति।

क्तप्रत्ययान्तशब्दः सामान्यतया प्रातिपदिकत्वात् फिषोऽन्तोदात्तः 1.1. इत्यनेन अन्तोदात्तो भवति। किन्तु संज्ञायां द्व्यचः निष्ठान्तस्य आदिः आकारभिन्नः अच् **निष्ठा च द्व्यजनात्** 6.1.205 इत्यनेन उदात्तो भवति। तथैव निष्ठाप्रत्ययान्तौ शुष्कधृष्टशब्दौ **शुष्कधृष्टौ** 6.1.206 इत्यनेन आद्युदात्तौ भवतः। आङ्पूर्वकाद् अश् भोजने धातोः कर्त्तरि क्त-प्रत्यये सति सिद्धः आशितशब्दः **आशितः कर्त्ता** 6.1.207 इत्यनेन आद्युदात्तो भवति। इत्थमेव क्तप्रत्ययान्तो रिक्त-शब्दो विभाषया रिक्ते विभाषया **रिक्ते विभाषा** 6.1.208 इत्यनेन आद्युदात्तो भवति। सूत्रमिदं **निष्ठा च द्व्यजनात्** 6.1.205 इत्यस्यापवादोऽस्ति। एवमेव क्तप्रत्ययान्तौ जुष्टः अर्पितः इति शब्दौ **जुष्टार्पिते च छन्दसि** 6.1.209 इत्यनेन विभाषया आद्युदात्तौ भवतः। इत्थं क्तप्रत्ययान्तानां शब्दानां स्वरव्यवस्था वर्त्तते। इत्थं विविधेष्वर्थेषु वाक्यसौष्ठवाय लाघवेनार्थबोधनाय क्तप्रत्ययान्तशब्दाः व्यवहाराय सर्वैरपि सावधानतया अवबोधनीया इति शम्।

❖

**सन्दर्भाः**


1. म.भा. 3.1.1 2. शब्दकौस्तुभे निष्ठा 3.2.102इति सूत्रे।
3. सिद्धान्तकौ. कृ.प्र.तस्मिन्नेव 3.4.71 इति सूत्रे।
4. म.भा. 1.1.26 5. म.भा. उद्द्योते 3.2.102
6. काशिका 3.2.102 इति सूत्रे पदमञ्जरीग्रन्थे।
7. काशिकान्यासे 3.2.102 इति सूत्रे।
8. म.भा. इति सूत्रे। 9. कारकप्रकरणे षष्ठीविभक्तौ **न लोका** इति सूत्रे।


❖



# औपनिषच्छिक्षायाः उद्देश्यानि

**डॉ. रमाकान्त मिश्रः**

'उपनिषत्'–शब्दस्य व्युत्पत्तिः– उप + नि + षद् + क्विप्, यस्यार्थः वर्तते समीपे उपवेशनम्, अर्थात् गुरोः चरणसमीपे उपविश्य अध्ययनम् इत्यर्थः। उपनिषदां तात्त्विकविवेचनं संवादरूपेण वर्तते, यत्र शिष्यः प्रश्नं करोति, विद्वान् गुरुः विभिन्नविधिभिः तस्य जिज्ञासां शमयितुं प्रयतते। शिष्यः मध्ये मध्ये स्वसन्देहान् पृच्छति, गुरुरपि तान् सन्देहान् विनारयति। उपनिषदः परम्परेयं शिक्षासम्बद्धान् त्रीन् अभिप्रायान् स्पष्टयति-

1. ज्ञानं स्वप्रयासेन ग्रहणीयं भवति, परन्तु ज्ञानप्राप्तिप्रक्रियायां गुरोः साहाय्यस्य मार्गदर्शनस्य च आवश्यकता भवति।

2. शिक्षा वैयक्तिकरूपेण ग्रहणीया भवति, सामूहिकरूपेण सर्वे विद्यार्थिनः स्वावश्यकतानां क्षमतानां योग्यतानाञ्च अनुसारं स्वस्य गतेः स्वनिर्मितयोजनानुसारं च शिक्षाग्रहणं कुर्वन्ति। ईदृशशिक्षा एकस्मिन् समये एकगत्या, पूर्वनिर्धारितयोजनानुसारं प्रदातुं न शक्यते।

3. उपनिषज्ज्ञानं गूढं रहस्यमयं च वर्तते। ज्ञानप्राप्तेः फलस्वरूपेण ज्ञातुः शक्तिरनन्तगुणवर्धिता भवति। अतः ज्ञानं तस्मै प्रदातव्यं, यः ज्ञानप्राप्तये पात्रं भवेत्। अपात्राय ज्ञानस्य शक्तेश्च दुरुपयोगस्य आशङ्का भवति।

## उपनिषदां शिक्षोद्देश्यम्

विविधोपनिषत्सु शिक्षोद्देश्यानां व्याख्यानं बहुभिः प्रकारैः कृतं विद्यते। परन्तु आहत्य एतेषां सर्वेषाम् आशयस्तु एक एव निष्पद्यते। उपनिषदि एकत्र उल्लिखितमस्ति "विद्ययाऽमृतमश्नुते" अर्थात् विद्यया अमरत्वं प्राप्यते। अस्यायमाशयः–विद्यया सर्वविधबन्धनेभ्यो मुक्तिर्लभ्यते। मृत्योर्मुक्त्यै आत्मनः वास्तविकप्रकृतेः ज्ञानमावश्यक-मस्ति। आत्मानुभूतेः परम् अमरत्वं प्राप्तं भवति। तथैव सर्वेभ्यो दुःखेभ्योऽपि

निवृत्तिर्लभ्यते। मृत्युरेव सर्वाधिकं दुःखम्। यदि एतस्य रहस्यं ज्ञातुं शक्यते, तर्हि अन्यदैहिकसांसारिकदुःखानि स्वाभाविकरूपेण विनश्यन्ति। आत्मनः वास्तविकज्ञानं विना नैतत् सम्भवति। उपनिषदः मूलविषयोऽस्ति आत्मज्ञानम्। विभिन्नोपनिषदामध्ययनेन ज्ञायते यत् सत्, ब्रह्म, आत्मा इति शब्दत्रयम् एकस्याः सत्तायाः कृते प्रयुज्यते। आत्मब्रह्मणोः एकत्वमङ्गीकृतम्। व्यक्तेः आत्मनि समष्टेः आत्मनि च तादात्म्यं वर्तते। इत्थम् आत्मनि, सर्वभूतात्मनि, ब्रह्मणि च एकाकारत्वं वर्तते। कठोपनिषदि कथितमस्ति "आत्मा सर्वेषु गूढोऽस्ति। तस्मात् सः तत्र प्रकटितो न भवति, परन्तु दिव्यदृष्ट्या तीक्ष्णबुद्ध्या च स द्रष्टुं शक्यः।'

आत्मनः लक्षणम् - "सत्यं ज्ञानमनन्तं ब्रह्म" अर्थात् यत् सत्यं, तस्य कदापि अन्तमपि नास्ति। अतः बृहदारण्यकोपनिषदि प्रार्थना कृता अस्ति- "हे ईश्वर! माम् असत्यात् सत्यं प्रति गमय, अन्धकारात् प्रकाशं प्रति प्रेरय, मृत्योः अमरत्वं प्रति नय।"[1]

आत्मानुभूतेः सर्वोत्कृष्टवर्णनं तैत्तिरीयोपनिषदि लभ्यते। आनन्दस्य स्वरूपस्य विषये उपनिषदियं कथयति–

"आनन्दात् सर्वे प्राणिनः उत्पन्नाः, तस्य फलस्वरूपेण जीवन्ति, मृत्योरनन्तरं तस्मिन्नेव विलीनाश्च जायन्ते। यः मनुष्यः आनन्दमेनं प्राप्नोति सः मनसा वाचा च अगम्यं ब्रह्मानन्दमनुभवति। तस्य कापि प्रकारभीतिर्न भवति। तं सत्कार्यकरणस्य, पापकर्मपरित्यागस्य च विचारो न पीडयति। यः आनन्दमनुभवति, सः पापपुण्याभ्यां बहिर्भवति।"[2]

उपनिषत्सु वर्णितः आनन्दः किमपि बाह्यं वस्तु नास्ति, अयं तु सर्वजनान्तर्निहितोऽस्ति, अयन्तु आत्मनः शाश्वतस्वरूपम्। अयं ह्यात्मा अविच्छिन्नो वर्तते। अस्माकं सम्पूर्णं जीवनम् अनेन आनन्देन परिपूर्णमस्ति। आनन्दः आत्मनो लक्षणं न भवति चेत् जीवनं कठिनं जायते। वयं जीवितुमिच्छामः। किमर्थं वा? यतः अस्मिन् वयं स्वात्मनिहितमानन्दमवलोकयामः। विचारोऽयं बृहदारण्यकोपनिषदि याज्ञवल्क्येन मैत्रेय्यै प्रदत्ते प्रबोधे प्रदर्शितोऽस्ति। यथा "पतिः, पत्नी, पुत्रः, धनं, ब्राह्मणत्वं, क्षत्रियत्वं, लोकः, देवः, प्राणी, सर्वाणि वस्तूनि च आत्मनः प्रियाणि न भवन्ति, अपि तु तस्मिन् वयं स्वात्मतत्त्वं पश्यामः (आनन्दस्य दर्शनं कुर्मः)। अतः इमानि अस्माकं कृते प्रियाणि भवन्ति।"[3]



यद्यपि आत्मनः अविच्छिन्नलक्षणत्वेन आनन्दः अस्मासु अन्तर्निहितो विद्यते, तथापि वयं तेन रहिताः स्मः। तस्य प्रतीतिं कर्तुं न प्रभवामः, यतः अज्ञानस्य कारणात् वयमितस्ततः भ्रमामः। आनन्दस्य अन्वेषणं वयं कदाचित् इन्द्रियजन्यसुखेषु कर्तुमिच्छामः। कदाचित् भौतिकजगतः पदार्थेषु तस्य दर्शनं कर्तुमिच्छामः। एवमस्माकमात्मा यः आनन्दमयो वर्तते, तदुपरि अनेकान्याच्छादनानि वर्तन्ते[1] यस्यान्तर्भागात् आनन्दस्य लघुतरदृष्टिः प्राप्यते, परन्तु वास्तविकानन्दानुभूतिर्न भवति। आत्मनः एतेषां विविधाच्छादनानाम् अनावरणं कर्तुं हि शिक्षायाः उद्देश्यानां क्रमः निहितोऽस्ति। आत्मनः विविधावरणानां निष्कासनं विना आनन्दस्य चर्चा साररहिता असङ्गता च दृश्यते। शिक्षया क्रमशः प्रगतिः सम्पाद्यते। आदावेव उच्चतमममूल्यस्य सम्प्राप्तिर्न जायते। परमानन्दस्य प्राप्त्यर्थं क्षणिकानन्दस्य पूर्वप्रतीतिरपि आवश्यकी। तैत्तिरीयोपनिषदि आनन्दमयोद्देश्यस्य प्राप्त्यर्थं यानि सोपानानि उल्लिखितानि, तान्येव सोपानानि शैक्षिकोद्देश्यानाम् उत्क्रमाः इत्यवगन्तुं शक्यते।

## अन्नमयकोषः

आनन्दस्य प्रथमं निम्नतमस्वरूपञ्च अन्नमयत्वं वर्तते, अर्थात् जीवनस्य भौतिकपक्षाणां सम्प्राप्तिः आनन्दप्राप्तेः प्राथमिकं लक्षणम्। शिक्षायाः प्राथमिकमूल्यं भौतिकजीवनस्य सम्पन्नतायां निहितं भवेत्। कस्यामपि शैक्षिकयोजनायाम् उदरपूर्तेः परिवारस्य भरणपोषणकलायाः प्रथमं स्थानं भवेत्। शिक्षायाः राष्ट्रियोत्पादने महत्त्वपूर्णयोगदानं वर्तते। आनन्दप्राप्तेः प्रथमं सोपानं भौतिकसम्पन्नता। भौतिकतत्त्वानां परिचयस्य, तदुपयोगस्य, भौतिकसम्पदभिवृद्धिक्रियाणां च ज्ञानम् एतदुद्देश्यान्तर्गतं भवति।

## प्राणमयकोषः

भौतिकस्वापेक्षया प्राणमयस्वम् उच्चतमं भवति। भौतिकजगतः अपेक्षया प्राणिजगत् श्रेष्ठं भवति। प्राणाः हि सा शक्तिः, यया वनस्पतिः प्राणिजगच्च श्वसिति, तत्र रक्तं सञ्चरति, अस्थिनिर्माणं जायते, स्नायुसंस्थानं स्वकार्यं करोति, इन्द्रियाणि स्वविषयेषु प्रवर्तन्ते। यावत् शशीरं स्वस्थं नास्ति, अस्थीनि दृढानि न भवन्ति, रक्तसञ्चारः सम्यक् न जायते, श्वासप्रक्रिया सम्यक् न प्रचलति, तावत्पर्यन्तम् आनन्दः कुतः? एवं शरीरस्य लक्षणम्, प्राणिजगतः अध्ययनञ्च शिक्षायाः द्वितीयमुद्देश्यमस्ति।

## मनोमयकोषः

प्राणमयात्मनः अपेक्षया मनोमयात्मनः स्थानं श्रेष्ठमस्ति। प्राणास्तु अन्येषु सर्वेषु जीवनधारिषु भवन्ति। वनस्पतिषु, कृमिकीटेषु, पशुपक्षिषु, सर्वप्राणिषु च प्राणाः वर्तन्ते, किन्तु ते मनुष्यवत् न विकसन्ति। अन्यप्राणिभ्यो मनुष्यो भिन्नो वर्तते, यतोहि तस्य मनः वर्तते, स विचारयितुं शक्नोति, स्मरणं कर्तुं शक्नोति, नवकल्पनां कर्तुं शक्नोति, प्राचीनानुभवान् नवपरिस्थितिषु प्रयोक्तुं शक्नोति, तथा प्राचीनानुभवैः लाभं प्राप्य स्वव्यवहारं परिवर्तयितुं शक्नोति। मनसा इन्द्रियप्रदत्तज्ञानस्य विश्लेषणं क्रियते, सञ्चयनं क्रियते, तथा तद्वर्गीकरणञ्च क्रियते। एवमेव शिक्षायाः तृतीयमुद्देश्यं बालकस्य मानसिकविकासोऽस्ति। मानसिकविकासान्तर्गतप्रत्ययानां निर्माणं मानसिकदक्षतानां विकासः, तथ्यानां सञ्चयनं, भाषासम्बद्धयोग्यतानां विकासः, परिवेशस्य परिचयः इत्यादीनां समावेशोऽत्र क्रियते। मानसिकविकासे सञ्चितज्ञानराशेः सञ्चयनं, तस्य स्थानान्तरणं, तत्समृद्धिश्च आयाति। संक्षेपेण शिक्षायाः तृतीयम् उद्देश्यं नाम ज्ञानात्मकविकासः।

## विज्ञानमयकोषः

मनोमयात्मनः सोपानात् उपरितनं सोपानं विज्ञानमयात्मा वर्तते। इन्दियाणां, मनसश्च साहाय्येन सर्वप्रकारकज्ञानस्यानुभूतिर्भवितुं नार्हति। अतीन्द्रियज्ञानस्य बोधः मनसाऽपि कर्तुं न शक्यते। तथ्यानां ज्ञानन्तु मनसा क्रियते, परन्तु प्रेयश्श्रेयसोर्मध्ये निर्णयं कर्तुं मनः समर्थं न भवति। जीवने अस्माभिः अनेकप्रकारनिर्णयाः स्वीकरणीयाः भवन्ति, इमे निर्णयाः बुद्धेः साहाय्येन क्रियन्ते। एवञ्च शिक्षायाः चतुर्थमुद्देश्यं बालकस्य बौद्धिको विकासः, यतः सः सदसदोः प्रेयश्श्रेयसोश्च अन्तरं कर्तुं शक्नुयात्। सृष्टिसम्बद्धम् इन्द्रियजन्यं ज्ञानं विकसितं, परिष्कृतं विवेकयुक्तञ्च कर्तुं बुद्धेरावश्यकताऽस्ति। योग्यनिर्णयस्वीकारयोग्यतायाः विकासः शिक्षायाः चतुर्थमुद्देश्यमस्ति।

## आनन्दमयकोषः

आनन्दमयात्मनः स्थानं सर्वोपरि वर्तते। अस्यां स्थितौ ज्ञातृ-ज्ञेय-ज्ञानानां मध्ये सर्वविधभेदाः नश्यन्ति। इयं स्थितिः शिक्षायाः दार्शनिकानुसन्धानस्य च चरमपरिणतिरस्ति। आनन्दः बन्धन-बाधाऽऽवरणरहितमुक्तावस्था वर्तते। आनन्दस्य वर्णनं शब्दैः कर्तुं न शक्यते यतो हि आनन्दः अनुभूतिजन्यः। सः इन्द्रियमनोबुद्धिभ्यः परोऽस्ति, अस्मिन्



आकाराः शङ्काः भ्रान्तयश्च विनष्टाः भवन्ति। व्यक्तेः धारणाः स्पष्टाः जायन्ते। अस्यामवस्थायां व्यक्तेर्विवेकः अनेन प्रकारेण विकसितो भवति येन प्रेयश्श्रेयसोर्भेदः सहजतया जायते। स भोजनं करोति परन्तु स्वादार्थं न, अपि तु आत्मोन्नतये। स शरीरं सशक्तं रक्षति, परन्तु अन्येषां पीडनाय न, अपि तु स्वकार्यं सुचारुरूपेण कर्तुम्। सः मनोगम्यज्ञानप्राप्तिं करोति, परन्तु प्रकृतिसमाजयोः शोषणार्थं न, अथवा इन्द्रियजन्यवासनानां तृप्त्यै न, अपि तु शुद्धनागरिकत्वेन सुन्दरजीवनयापनार्थम्। सः तार्किकबुद्धेः ज्ञानस्य सञ्चयं करोति, परन्तु विवादाय न, अपि तु आत्मजगतोः वास्तविकस्थितिं ज्ञातुम्। एषैव आनन्दमयस्थितिरस्ति, इयमेव मुक्तिरिति कथ्यते, अस्याः आत्मानुभूतिरिति नामान्तरं विद्यते, एषैव शिक्षायाः सर्वोच्चं लक्ष्यं वर्तते।

अन्तिमलक्ष्यस्य प्राप्तेः परं निम्नतरसोपानानि न नश्यन्ति, अपि तु सोपानमार्गस्य अङ्गानि भवन्ति। उपनिषदः निम्नस्तराणामुपेक्षां न कुर्वन्ति। एकस्मात् सोपानात् सोपानान्तरं स्वाभाविकरूपेण आरोढुं शक्यते। आनन्दमयस्थितिं प्राप्य अन्योद्देश्यानि तिरोहितानि न भवन्ति, अपि तु तेषामाध्यात्मिकीकरणं जायते। सम्पूर्णजीवनं विवेकयुक्तं सम्भवति, यस्मिन् आनन्दः परिपूर्णः सञ्जायते।

उपर्युक्तविवेचनेन स्पष्टमिदं यत् अन्तिमोद्देश्यस्य प्राप्तये प्राथमिकानि चत्वारि उद्देश्यानि साधनत्वेन प्रयुज्यन्ते। उपनिषत्काराः साधनात्मकोद्देश्ये साध्ये च अन्तरं कुर्वते, परन्तु तात्कालिकोद्देश्यानि नोपेक्षितानि। तदा समस्या उपस्थिता भवति, यदा साधनं हि साध्यत्वेन मन्यते। अत एव उपनिषत्कारैः पौनःपुन्येन कथ्यते यत् तात्कालिकोद्देश्यन्तु तुच्छम्, आत्मज्ञानमेव अन्तिमं लक्ष्यं, तदेव ग्राह्यम्। विषयोऽयं कठोपनिषदि यमनचिकेतसोः संवादे इतोऽपि स्पष्टीकृतं वर्तते।

"श्रेयः प्रेयश्च भिन्ने वर्तेते। एतद्द्वयं मनुष्यं विभिन्नप्रयोजनैः आबध्नाति। एतयोर्मध्ये श्रेयः स्वीकरणीयमस्ति। यः श्रेयः स्वीकरोति सः लक्ष्यभ्रष्टो न भवति। एतद्द्वयमपि मनुष्यं प्रभावयति। पण्डिताः द्वयोरेतयोर्विचारं कृत्वा तयोरन्तरं पश्यन्ति। प्रेयसः स्थाने श्रेयः चिन्वन्ति, परन्तु मूढाः सांसारिकानन्दाय प्रेयः चिन्वन्ति।"

उपनिषत्सु प्रेयसः उपेक्षा न क्रियते, अपि तु प्रेयः श्रेयोनिमित्तमिति उपदिष्टम्। आत्मा यः आनन्दस्वरूपी वर्तते, तं परित्यज्य प्रयुज्यमानं श्रेयः वर्ज्यम्। तैत्तिरीयोपनिषदि पुनरेकवारं स्वच्छात्रेभ्यः दीक्षान्तभाषणे प्रदीयमानोपदेशः एवं वर्तते-

"भूत्यै न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्।" अर्थात् हितस्य कल्याणस्य

च उपेक्षा न कर्तव्या। इत्थं छात्रेभ्यः अयमुपदेशो दत्तः, यत् आत्महितमपि जीवनस्य एकः महत्त्वपूर्णः पक्षो वर्तते।

एवंरीत्या औपनिषच्छिक्षोद्देश्यानि सार्वकालिकानि। दीर्घदृष्टिसम्पन्नाः भारतीयमनीषिणः लोककल्याणाय आत्मोद्धाराय च उपादिशन् इति स्पष्टं प्रतीयते।

❖

**सन्दर्भाः**

1. असतो मा सद् गमय। तमसो मा ज्योतिर्गमय। मृत्योर्माऽमृतङ्गमय। (बृहदा.उप.3.28 अध्याय-1)

2. आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। (भृगुवल्ली-6, तैत्ति.उ.)

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणे विद्वान्। न बिभेति कुतश्चनेति। एतं ह वाव न तपति। किमहं साधुना करवं किमहं पापमकरवमिति। स य एवं विद्वानेते आत्मानं स्पृणुते। उभे ह्येवैष एते आत्मानं स्पृणुते। य एवं वेद। (ब्रह्मवल्ली-9, तैत्ति.उ.)

3. न वा अरे पत्युः कामाय पतिः प्रियो भवति। आत्मनस्तु कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाया प्रिया भवति। आत्मनस्तु कामाय जाया प्रिया भवति। न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति। न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति। न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति। न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति। न वा अरे लोकानां कामाय लोकाः प्रियाः भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति। न वा अरे देवानां कामाय देवाः प्रियाः भवन्त्यात्मनस्तु कामाय देवाः प्रियाः भवन्ति। न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति। न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति। (बृहदा.उप.अध्याय 2,4-5)

❖



# भारती कवेर्जयति

**डॉ. मिथिलेश कुमारः**

'कवेः कर्म काव्यम्' इति व्युत्पत्त्या काव्यमपूर्वं निर्माणं वर्त्तते। भौतिकसंसार इव काव्यसंसारोऽपि विचित्र आकर्षकोऽभिनवश्च भवति। भौतिकोऽयं संसारः प्रजापतिना विधात्रा रचितो विचित्रव्यवहारमयो रमणीयश्चेति न संशयः। काव्यसंसारस्तु ततोऽप्यभिनवतरो विलक्षणो हृदयावर्जकश्चेति सुतरां रसिकान्मानवानाकर्षति। प्रायेण संस्कृतसाहित्यसमीक्षका भूतजगत्काव्यजगतोस्तारतम्यं विचारयन्ति। तेष्वाचार्यो मम्मटः काव्यप्रकाशस्य कविभारतीस्तुतिपरायां प्रस्तावनायां कथयति–

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।**

काव्यजगतो वैशिष्ट्यमनेन वर्णितं भवति।

कवेर्निर्मितिः प्रजापतिनिर्मितेर्नूनमेव पृथक्प्रतिभाति। ब्रह्मणः सृष्टिर्विवर्तरूपेति प्रतिपादयन्त्यद्वैतब्रह्मवादिनः। एवमेव कविनिर्मितिरपि शब्दविवर्त्त इति शब्दाद्वैतवादिनो वदन्ति। सत्यपि तादृशे सामान्ये कविनिर्मितिर्विजयते विशेषत्वात्। कथमित्याह– प्रजापतिसृष्टिस्तु कतिपयानां नियमानां समुदायभूता, यथा रूपरसगन्धादीनां पृथक्पृथग्द्रव्यधर्मत्वं दर्शनशास्त्रे प्रसिद्धम्। किन्तु कविनिर्मितौ न तादृशो नियतिकृतो नियमः। तथाहि–नायिकानां मुखे कमलसौरभं नयनयोः कमलसौन्दर्यं वपुषि च कमलकोमलत्वं वर्ण्यते। किं च कविः विरहितानां नायिकानां कृते शीतलामपि ज्योत्स्नामुष्णामिति वर्णयति। धारासारोऽपि बाणवृष्टिरिव वर्णितो भवति। एवं कविनिर्मितिर्नियतिकृतनियमरहितेति दर्श्यते।

विधातृरचिते संसारे सत्त्वादीनां गुणानां परस्परोद्रेकात्कदाचित्सुखमयत्वम्, कदाचिद्

दुःखात्मकत्वम्, कदाचिन्मोहात्मकत्वं व प्रतीयते। किन्तु कविसृष्टौ नास्ति दुःखस्य लेशः, सर्वत्रानन्दरूपतैव कविरचनायाः। अतएव ह्लादैकमयी निर्मितिः कविवरेण्यानाम्। यथा रघुवंशेऽजविलापप्रसङ्गे उत्तररामचरिते च सीताविरहितस्य रामस्य मोहादिप्रसङ्गे करुणरसेऽपि ह्लादस्यैवानुभवो रसिकानां न दुःखस्य। अतः कविनिर्मितिर्विशिष्यते विजयते च।

कविरचनाया वैलक्षण्यान्तरमपि दर्शितमनन्यपरतन्त्रामिति वादिनाचार्येण। ब्रह्मणः सृष्टिः सांख्यदर्शनमतेन प्रकृतिमाश्रित्य, नैयायिकमतेन समवायिकारणमाश्रित्य वा प्रवर्तते। परतन्त्रा खलु सा कविनिर्मितिः। उक्तं चानन्दवर्धनेन–

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोवते विश्वं तथेदं परिवर्तते।।**

कवेः स्वाधीनतया कदाचित्प्रसिद्धमिति वृत्तमपि परिवर्तितं सद् हृदयमावर्जयति। यथा कालिदासेन शाकुन्तलनाटके दुर्वाससः शापस्याङ्गुलीयकस्य च वृत्तमुपन्यस्यापूर्वः चमत्करचारुः काव्यसंसारो निरमायि। अतएवापराप्युक्तिरत्र प्रवृत्ता यथा–**निरङ्कुशाः कवयः** इति।

विधातृसृष्टेरपरोऽपि विशेषो वर्त्तते यत्तत्र षड् रसा भवन्ति–'**मधुराम्ललवणकटुकषायतिक्तरूपाः।**' तेऽपि सर्वे न सर्वेषां हृद्याः। केचन केषाँश्चिदप्रिया अपि भवन्ति। किन्त्वपरत्र कविरचनासु ये रसा आस्वाद्यन्ते तेषां संख्या नव इति विद्यते, न षडेव। शृङ्गारकरुणादयो नव रसाः काव्ये नाट्ये वाऽऽनन्दमया एवेति सर्वेषामुपादेयाः। अतएव मम्मटः कविनिर्मितिं नवरसरुचिरामित्याचष्टे।

यतः कविनिर्मितिः विधातृनिर्मितिमतिशेते, अतएवोत्कर्षं गता सा जयति। नूनमेव कविसृष्टिः संसारेऽद्भुतं प्रभावं जनयति, न तथा भौतिकजगति लब्धुं शक्यते। कवीनां शब्दार्थप्रयोगा अमरतां लभन्ते, रसोद्भावनं च जना निपुणमाद्रियन्ते।

❖



# योगवासिष्ठे जीवन्मुक्तविमर्शः

**मीना देवी**

भारतीयदर्शनेषु मुक्तेः स्वरूपं विभिन्नप्रकारेण प्रतिपादितं वर्त्तते, किन्तु मुक्तिः परमप्रयोजनमिति विषये दार्शनिकेषु नास्ति कोऽपि भेदः। सर्वैरपि दार्शनिकैरिदं स्वीक्रियते यन्मुक्तिः एव जीवानामन्तिमं लक्ष्यमस्ति। सा च मुक्तिर्नित्या। नित्यत्वविषये भगवती श्रुतिः आह– **न स पुनरावर्त्तते।**[1] इति।

अद्वैतवेदान्तनये ब्रह्मसाक्षात्कार एव पुरुषार्थस्तया चोक्तं भामत्याम्–

**ब्रह्मानुभवो ब्रह्मसाक्षात्कारः परमपुरुषार्थः।**[2]

अतः ब्रह्मसाक्षात्कार एव पुरुषाणां लक्ष्यं स्यात्। ब्रह्मज्ञानेनैव अज्ञानस्य निवृत्तिः ब्रह्मस्वरूपभूतस्य मोक्षस्योपलब्धिश्च जायते।

ब्रह्मैव केवलं सद्वस्तु वर्त्तते, यतोहि मोक्षः ब्रह्मस्वरूपः अतः सोऽपि सन् नित्यः[3] इति। मोक्षकालेऽस्मिन् साधकानां शरीराम्भकप्राणाः स्वकारणे लीना भवन्ति। अतः आत्मभावेन संस्थितिरेव मोक्षः, न तु लोकान्तरप्राप्तिः। अतएवोक्तं मुण्डकोपनिषदि-

**गताः कलाः पञ्चदश प्रतिष्ठा**
**देवाश्च सर्वे प्रतिदेवतासु।**
**कर्माणि विज्ञानमयश्च आत्मा**
**परेऽव्यये सर्व एकीभवन्ति।।**[4]

अद्वैतवेदान्तदार्शनिकैर्मुक्तेर्द्वैविध्यं स्वीकृतम्– जीवन्मुक्तिर्विदेहमुक्तिश्च। तत्र स शरीरी जीवः ब्रह्मज्ञानमाप्त्वा यां मुक्तिं लभते सा जीवन्मुक्तिः। अर्थादत्र साधकानां जीवनकाले एव मुक्तिर्भवति। तथा प्रारब्धकर्मणः फलभोगानन्तरं देहपातसहिता या मुक्तिः सा विदेहमुक्तिरिति व्यवस्था।

जीवन्मुक्तपुरुषाणां स्वरूपं लक्षणञ्च शास्त्रेष्वेवं वर्ण्यते। यथा श्रीमद्भगवद्गीतायां भगवता कृष्णेनोक्तम्–

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।**[5]

श्रीशङ्कराचार्यभगवत्पादाः जीवन्मुक्तविषये इत्थं वर्णयन्ति – **न देशकालनिमित्तमपि सङ्कीर्तयति**[6] इति। जीवन्मुक्तस्य लक्षणं मुण्डकोपनिषदि एवं वर्ण्यते–

**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे।।**[7] इति।

इत्यञ्च 'विवेकचूडामणौ' भगवता शङ्कराचार्येण जीवन्मुक्तस्य लक्षणं निरूपितम्–

**वर्तमानेऽपि देहेऽस्मिञ्छायावदनुवर्तिनि।**
**अहन्ताममताभावो जीवन्मुक्तस्य लक्षणम्।।**[8]

अपि च–

**अत्यन्तकामुकस्यापि वृत्तिः कुण्ठति मातरि।**
**तथैव ब्रह्मणि ज्ञाते पूर्णानन्दे मनीषिणः।।**[9]

यथा श्रुतिस्मृतिशास्त्रग्रन्थेषु जीवन्मुक्तेर्विवेचनमुपलभ्यते तथैव योगवासिष्ठेऽपि। आध्यात्मिकदार्शनिकपौराणिकवाङ्मयेषु 'योगवासिष्ठस्य' महन्महत्त्वं वर्त्तते। योगवासिष्ठविषये तदध्येता डॉ. भीखनलालमहोदय आह–

'यन्महत्त्वं भगवद्भक्तानां कृते 'श्रीमद्भागवतश्रीरामचरितमानसयोः' वर्त्तते अपि च यन्महत्त्वं कर्मयोगिनां कृते 'श्रीमद्भगवद्गीतायाः' वर्तते तदेव महत्त्वं ज्ञानिनां कृते श्रीयोगवासिष्ठस्य। अयमेक एतादृशोऽद्भुतो ग्रन्थः यास्मिन्नध्येता काव्योपाख्यानदर्शनादीनां सर्वेषाम् (साहित्यपुराणदर्शनानाञ्च) आनन्दं प्राप्नोति। ग्रन्थोऽयं भारतीयमहत्त्वपूर्णग्रन्थेषु सर्वोत्तमकृतिष्वेकः।'

ग्रन्थेऽस्मिन् षट्प्रकरणानि सन्ति। यथोच्यते अभिनन्दमहोदयेन–

**इह वैराग्यमुमुक्षुव्यवहारोत्पत्तिस्थितयः।**
**उपशमनिर्वाणाख्ये वासिष्ठे षट् प्रकरणानि।।**[10]

तत्र प्रत्येकं प्रकरणं सर्गाख्यम् इति प्रतीयन्ते। द्वात्रिंशत्सहस्रपद्यसंवलितोऽयं



ग्रन्थः विशालकायकलेवरं धत्ते। यथा–

**त्रिंशद्द्वे च सहस्राणि ज्ञाता निर्वाणदायिनी।**[11]

उक्तगुणलक्षणैरलङ्कृते ग्रन्थेऽस्मिन् 'जीवन्मुक्त' इति विषयस्यास्य वर्णनं विस्तरेण निरूपितम्। तत्र जीवन्मुक्तस्वरूपञ्चेत्थं प्रतिपादितमस्ति। यथा–

**यस्योन्मेषनिमेषार्द्धाद्विदः प्रलयसम्भवौ।**
**पश्येत् त्रिलोक्याः स्वसमः स जीवन्मुक्त उच्यते।।**
**शान्तसंसारकलनः कलावानपि निष्कलः।**
**यः सच्चितोऽपि निश्चितः स जीवन्मुक्त उच्यते।।**
**यः समस्तार्थजातेषु व्यवहार्यपि शीतलः।**
**पदार्थेष्वपि पूर्णात्मा स जीवन्मुक्त उच्यते।।**[12]

एकस्मिन् प्रसङ्गे महर्षिर्वसिष्ठः राममवबोधयति–हे राम! विश्वस्यास्य शोभा तु जीवन्मुक्तपुरुषैर्भवति।

ये सुखेषु नोद्विग्नमनसोः दुःखेषु विगतस्पृहत्वेन तिष्ठन्ति अपि च ये सर्वाः क्रिया असङ्कल्पनया साधयन्ति, ते प्रपञ्चस्य मिथ्यास्वरूपमङ्गीकुर्वन्त आकाशवच्छून्यत्वमभिलषन्ति। यथा–

**यथास्थितमिदं यस्य व्यवहारवतोऽपि च।**
**अस्तं गतं स्थितं व्योम जीवन्मुक्त स उच्यते।।**[13]

जीवन्मुक्तपुरुषाः वाञ्छां परित्यज्य शत्रुमित्रादिसर्वेष्वेकत्वं स्वीकृत्य उद्वेगरहिताः, विवेकवन्तः, शीलवन्तः, ज्ञानवन्तः, षोडशांशचन्द्रः इवाभासन्ते। यथोचितकाले प्राप्तवस्तूनामभिनन्दनं तथाऽप्रियवस्तूनामुपहासं कदापि न कुर्वन्ति, तात्पर्यमिदं वर्त्तते यत् तटस्थस्वभावेन विराजन्ते ते इति। अपि च सर्वं कार्यं कृत्वाऽप्यकर्त्तार इवाचरन्ति। जाग्रदवस्थायामपि सुषुप्ता इव व्यवहरन्ति। यथा–

**बोधैकनिष्ठतां यातो जाग्रत्येव सुषुप्तवत्।।**[14]
**यो जागर्ति सुषुप्तस्थो यस्य जाग्रन्न विद्यते।।**[15]

तेषामात्मा अनन्तः सत्स्वरूपो व्यापकः प्रकाशमानः शुद्धश्च जायते अर्थात् ते रागद्वेषरहितत्वे सति खमिव निर्मलात्मन्येव रमन्ते। तथा च सांसारिकपदार्थानां

कर्तृभोक्तृवक्तृश्रोतृत्वेनापि तेषां मतिः कर्तृत्वाकर्तृत्वादिभिरसंश्लिष्य भवति। अर्थात् ते सर्वदाऽहङ्कारादिभिरनिर्लिप्ताः। यथा–

**यस्य नाऽहंकृतो भावो यस्य बुद्धिर्न लिप्यते।**
**कुर्वतोऽकुर्वतो वाऽपि स जीवन्मुक्त उच्यते।।[16]**

ते चिन्तयन्ति–बन्धुरयमयं शत्रुः, ममेदं, ममेदं न इत्यादिमिथ्यादृष्टिस्तु क्षुद्रजनानां न खल्वस्माकं कृते। तथा चैतादृशी दृष्टिर्विचारेण नश्यति। यथोच्यते–

**अयं बन्धुरयं नेति गणना लघुचेतसाम्।**
**उदारचरितानां तु विगतावरणैव धीः।।[17]**

अपि च–

**न तदस्ति न यत्राहं न तदस्ति न यन्मम।।[18]**

अपि च योगवासिष्ठकारेण जीवन्मुक्तपुरुषाणां केचन सामान्यगुणा इत्थं निरूपिताः। यथा–

**स्वच्छतोर्जिता सत्ता हृद्यता सत्यता ज्ञता।**
**आनन्दितोपशमिता सदा च मृदुभाषिता।।**
**पूर्णतोदारता सत्यकान्तिमत्तैकतानता।**
**सर्वैकता निर्भयता क्षीणद्वित्वा विकल्पिता।।[19]**

तात्पर्यमिदं वर्त्तते – यत् तेषां साधारणो धर्मो वर्त्तते – स्वच्छत्वम्, उर्जितत्वं, सत्त्वं, सहृदयत्वं, ज्ञातृत्वम्, आनन्दितत्वम्, उपशमत्वं, सर्वस्मिन् काले मृदुभाषित्वं. पूर्णत्वं, कान्तिमत्त्वम्, एकतानत्वं, सर्वात्मकत्वं, निर्भयत्वं, नित्यत्वं, समत्वमादिकाः सर्वे गुणाः। तेषु केचनात्र विव्रियन्ते–

**1. आनन्दत्वम्–**जीवन्मुक्तः सुधारसैः परिपुष्टः सरोवर इव सर्वदा स्वात्मन्येव विहरति। तथा च षोडशकलान्वितशशाङ्क इव अन्येभ्योऽप्याह्लादं प्रददाति–

**रसायनपरापूर्णहृदवत् ह्लादमात्मनि।**
**धत्ते करोति वान्यस्य सकलेन्दुरिवामलः।।[20]**

सर्वत्र सर्वस्मिन् काले चासौ जीवन्मुक्तसाधकः विक्षेपरहितशान्तमनसा सदैव आनन्दरतो भवति। यथा–

**ज्ञानवानुदितानन्दो न क्वचित्परिमज्जति।**
**जीवन्मुक्तो गतासङ्गः सम्राडात्मेव तिष्ठति।।[21]**



**2. शान्तमनस्त्वम्–**प्रशान्तचित्तमेव यस्य प्रधानं लक्षणं यस्मात् परमात्मलाभरूपशान्तत्वं सहजतया प्राप्यते। अयञ्च पुरुषः ज्ञानीति कथ्यते। परमपदे विश्रान्तिं प्राप्य समदर्शिनां तत्त्वज्ञानिनामाचरणे शान्तचित्तत्वं रागद्वेषशून्यत्वं च परिदृश्यमानं भवति। तेन तस्य मनः शरत्कालीनो मेघ इव प्रतिभासते–

**शान्तता व्यवहारो वा रागद्वेषविवर्जितः।**
**विश्रान्तस्य परे तत्त्वे दृश्यते समदर्शिनः।।[22]**
**संशाम्यति शुद्धात्मा शरदीव पयोधरः।।[23]**

**3. मृदुभाषित्वम्–**तस्य भाषणं मनोरमं मधुरञ्च। तात्पर्यमिदं वर्त्तते यदेतस्य मुखारविन्दात् सर्वदा सर्वत्र प्रियं प्रीतियुक्तवाक्यमुच्चरितं भवति। तथा यदा तैः मुखमुद्घाट्यते तदा पवित्रः उदन्त एव प्रोच्यते–

**मनोज्ञमधुराचाराः प्रियपेशलवादिनः।।[24]**
**सर्वस्याभिमतं वक्ता चोदितः पेशलोक्तिमान्।।[25]**
**प्रवृत्तवाक्पुण्यकथो दैन्याद् व्यपगताशयः।।[26]**

**4. सत्स्वरूपम् –** सर्वजगदिदं सत्स्वरूपमात्मरूपञ्च। सत्स्वरूपमित्यस्य पदस्य तात्पर्यं यत् सर्वत्र एकमेव तत्त्वमात्मतत्त्वं ब्रह्मतत्त्वं वा वर्त्तते। तेन समग्रं प्रपञ्चमसदिति स्वीकृत्य परमात्मरूपं सदिति मन्यते–

**असद्रूपमिवासक्तं सर्वत्राखिलमात्मवान्।।[27]**

**5. एकाग्रवृत्तित्वम् –** योगवासिष्ठकारेणोक्तम्-एकाग्रवृत्तित्वं सर्वासां फलवत्तानां सर्वोत्तमोपायः। जीवन्मुक्तस्य लक्षणविवेचने यदा एकाग्रतां पश्यामः तदानीं तस्यैकाग्रभावना किमिति ज्ञातुं प्रभवामः। यथा-यदा जीवन्मुक्तपुरुषः एकाग्रतायां तिष्ठति तदा वज्रशब्दैः, पर्वतादिकविस्फोटकशब्दैरपि न विचलितो भवति। कुतः इत्युक्ते यदा सर्वसङ्कल्पादीनां कारणं मनोऽन्तरात्मनि विलीयते तदा तत् सर्वसंकल्पविकल्पवर्जितत्वेन तिष्ठति, यथा भस्मीभूतेषु तिलेषु तैलं न कदापि स्थातुं शक्यत इति–

**अशनिस्वनघोषेण नगस्फोटरवेण च।**
**एरावणनिनादेन सम्यग्ध्यानी न कम्पते।।[28]**

आमूलान्मनसि क्षीणे सङ्कल्पस्य कथा च का।
तिलेष्विवातिदग्धेषु तैलस्य कलना कुतः।।[21]

**6. सर्वात्मकत्वम्** – एष पुरुषः सर्वत्र सर्वप्राणिष्वेवं जडचेतनयोः एकमेव परमात्मानं पश्यति। विचारोऽयमेवं यत् जगदिदं ब्रह्ममयमिति ज्ञात्वा हिंसाद्वेषादि-रहितत्वेन तिष्ठति–

**स्वमेव पदमालम्ब्य सर्वभूतान्तरस्थितम्।।[30]**

**7. निःस्पृहत्वम्** – अकाम्यकर्माण्येते कुर्वन्तः दृश्यप्रपञ्चं तथैव न काम्यते यथा चैत्ररथनामोद्यानं गताः जनाः खदिरवनं गन्तुं नेच्छन्ति। तथा तस्य हृदये आकाङ्क्षा तथैव नोपलभ्यते यथा प्रस्तरे कदापि मञ्जर्यो न प्ररोहन्ते–

**तत्पदं साधवः प्राप्य दृश्यदृष्टिमिमां पुनः।**
**नायान्ति खदिरोद्यानं लब्धचैत्ररथा इव।।[31]**
**इच्छास्ततः समुद्यन्ति न मञ्जर्य इवोपलात्।।[32]**

**8. अनुचिन्तनम्** – एते सर्वदा परमात्मनः चिन्तने मग्नाः भवन्ति। एवं लोकशास्त्राविरुद्धकार्येभ्यो विरताः सर्वत्र सत्सङ्गं सम्पादयन्ति–

**विरुद्धकार्यविरता रसिकाः सज्जानस्थितौ।।[32]**

**9. सम्परितोषत्वम्** – सन्तोषरूपामृतरसेन पूर्णा एते सर्वे जीवन्मुक्ताः सर्वत्र आत्मतुष्टा इव विराजन्ते। तत्र यथोल्लिखितं वर्त्तते–

**स्मृत्वा स्मृत्वादः पूर्वसन्तोषामृतपोषितः।**
**अर्थानामप्यनर्थानां नाशेषु परितुष्यति।।[33]**
**ज्ञस्तिष्ठति स्वपिति जीवति नित्यतृप्तः।**
**आत्मवानिह सर्वस्मादतीतो विगतैषणः।।**
**आत्मन्येव हि सन्तुष्टो न करोति न चेहते।।[35]**

एवं योगवासिष्ठकारेण योगवासिष्ठे 'जीवन्मुक्तानां' निरूपणं कृतमित्यलम्।।

❖



## सन्दर्भाः


1. छान्दोग्योपनिषद् 8.15.1
2. भामती
3. तैत्तिरीयोपनिषद् शा.भा. 4.4.6
4. मुण्डकोपनिषद् 3.2.7
5. गीता 2.56
6. ब्र. सू. शा. भा. 3.4.51
7. मुण्डकोपनिषद् 2.2.8
8. विवेकचूडामणिः 432
9. विवेकचूडामणिः 445
10. लघुयोगवासिष्ठः 6.18.86
11. योगवासिष्ठः (योग.) 2.17.6
12. योग. 3.9.10,12,13
13. योग. 3.9.4
14. योग. 3.9.5
15. योग. 3.9.7
16. योग. 3.9.9
17. योग. 5.10.61
18. योग. 5.10.62
19. योग. 5.53.78,79
20. योग. 6.2.102.42
21. योग. 3.93.24
22. योग. 6.2.31.26
23. योग. 6.2.40.11
24. योग. 6.2.98.3
25. योग. 5.18.9
26. योग. 5.77.15
27. योग. 5.77.3
28. योग. 5.39.47
29. योग. 5.77.43
30. योग. 5.54.71
31. योग. 5.56.63
32. योग. 6.2.98.7
33. योग. 6.2.45.19
34. योग. 5.77.44
35. योग. 5.89.17


❖

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र–तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते। अ० = अष्टाध्यायी। वा० = वार्तिकम्

प्रायः प्रायग्रहणम् अकात्स्न्यार्थम्

का. पुंसि संज्ञायां घः प्रायेण 3.3.118

गोचरः (निपातनम्) गावः चरन्ति अस्मिन्निति

गोचरः (देशः)

संचरः (निपातनम्) संचरन्ते अनेन इति संचरः (मार्गः)

वहः ,, वहन्ति तेन वहः (स्कन्धः)

व्रजः ,, व्रजन्ति तेन व्रजः

व्यजः ,, व्यजन्ति तेन व्यजः (तालवृन्तम्)

आपणः ,, एत्य तस्मिन् आपणन्ति (पण्यस्थानम्)

निगमः ,, निगच्छन्ति तस्मिन् (छन्दः)

का. गोचरसंचरवहवृजव्यजापणनिगमाश्च 3.3.119

अध्यायः(निपातनम्) अधीयन्ते अस्मिन् इति अध्यायः

न्यायः ,, नीयते अनेन इति न्यायः

उद्यावः ,, उद्युवन्ति अस्मिन् इति उद्यावः

(यत्र सर्वे एकत्र भवन्ति)

संहारः ,, संह्रियन्ते अनेन इति संहारः

आधारः ,, आध्रियते अस्मिन् इति आधारः

का. अध्यायन्यायोद्यावसंहाराधारावायाश्च 3.3.122

कृच्छ्रम् कृच्छ्रं दुःखम् (तद् दुरो विशेषणम्)

अकृच्छ्रम् अकृच्छ्रं सुखम् (तदितरयोः (ईषत् - सु) विशेषणम्)

का. ईषद् दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् 3.3.126



# श्रीचैतन्यदेवप्रचारितस्य वैष्णवधर्मस्य सामाजिकः प्रभावः

**मौमिता भट्टाचार्यः**

विष्णुशब्दोत्तरम् अण्प्रत्यययोगेन वैष्णवमिति पदं सिध्यति। विष्णुर्येषाम् आराध्य-देवता ते वैष्णवा इत्युच्यन्ते। वैदिकसाहित्येऽपि विष्णुरिति देवतानाम प्राप्यते। **तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः**[1] इत्यादिमन्त्रेषु विष्णुशब्दप्रयोगः सुपरिस्फुटः। किन्तु वेदेषु कुत्रापि कृष्णलीलाविवरणं नैव स्फुटमुपलभ्यते। वैदिकयुगात् परवर्त्तिनि काले विरचितेषु हरिवंशविष्णुपुराण-श्रीमद्भागवतादिग्रन्थेषु तु कृष्णलीलाविवरणं विस्तरशः प्राप्यते। महाभारतेऽपि श्रीकृष्णः प्रधानचरित्रविशेषः, तत्रान्तर्गत-श्रीमद्भगवद्गीता स्वयं भगवतः श्रीमुखनिःसृतवाणीरूपेण बहुषु सम्प्रदायेषु सुगृहीता। वेदोत्तरयुगे उल्लेखयोग्यतया अवतारवादोऽपि सुप्रतिष्ठितः। **सम्भवामि युगे युगे**[2] इत्यादि भगवदुक्तिस्तत्र प्रमाणम्। पुराणेष्वपि अवतारवादः सम्यक् प्रतिष्ठतः। श्रीमद्भागवते एतदपि प्रोक्तं यत् **'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्'**[3] इति। कृष्णकथा खलु अतीव प्राचीना। यद्यपि नाम कृष्णलीलाविवरणं विस्तरशः वेदेषु न प्राप्यते तथापि वैदिकसाहित्यान्तर्गतायां छान्दोग्योपनिषदि देवकीपुत्रस्य कृष्णस्य उल्लेखोऽस्ति इति सत्यम्।[4] पातञ्जले महाभाष्येऽपि व्याकरणसूत्रोदाहरण-रूपेण प्रदत्तानि कानिचित् वाक्यानि यानि खलु कृष्णकथासूचकानि-यथा-जघान कंसं किल वासुदेवः, असाधुर्मातुले कृष्णः, सङ्कर्षणद्वितीयस्य बलं कृष्णस्य वर्द्धतामित्यादीनि।[5] एतेनापि कृष्णकथायाः प्राचीनत्वं प्रतीयते।

केचिद् वदन्ति प्राचीनसनातनधर्म्म एव परवर्त्तिनि काले वैष्णवधर्मरूपेण परिचितोऽभूत्। एतेषां वैष्णवानां मतेन पाञ्चरात्रागमोऽपि प्रामाणिको ग्रन्थः। भक्तिवादी रामानुजाचार्य्यः पाञ्चरात्रमतस्य सुप्रसिद्धः समर्थकः। मध्ययुगे वैष्णवानां नाना भेदा

आसन् इति शङ्करविजयादिग्रन्थतः विज्ञायते। तथा हि शङ्करविजयग्रन्थे प्रोक्तम्–

**भक्ता भागवताश्चैव वैष्णवाः पाञ्चरात्रिणः।**

**वैखानसाः कर्महीनाः षड्विधा वैष्णवा मताः।।**

**क्रियाज्ञानविभेदेन त एव द्वादशाभवन्।।**[6]

परवर्त्तिनि काले तु वैष्णवानां सम्प्रदायचतुष्टयमेव सुप्रसिद्धमभवत्। श्रीसम्प्रदायः, ब्रह्मसम्प्रदायः, रुद्रसम्प्रदायः, सनकसम्प्रदायश्चेति।[7] तदेवं दृश्यते वैष्णवधर्मस्य क्रमविकासो बहुयुगव्यापी नानाप्रदेशव्यापी च। वैदिकवत् अवैदिक-पाञ्चरात्रादिमतवादस्य विचारधारापि तत्रानुप्रविष्टा इति ऐतिहासिका वदन्ति। वङ्गदेशेऽपि वैष्णवधर्मस्य किञ्चिद्भिन्नतररूपेण विकासः समभवदिति तस्य समाजजीवने कीदृशः प्रभाव आसीदिति वर्त्तमानप्रबन्धस्य समीक्षाविषयः।

चैतन्यदेवस्य आविर्भावात् परं बङ्गदेशे वैष्णवभावधारा वर्षणप्लावितनदीवत् नवरूपतामलभत। पञ्चदशशताब्द्याम् (1486 खृष्टाब्दे) फाल्गुनपूर्णिमायां सन्ध्याकाले नवद्वीपे चैतन्यदेवो जन्मग्रहणमकरोत्। तस्य पितृदत्तं नाम विश्वम्भर इति। अद्वैतपत्नी सीतादेवी तस्य अपदेवता-कुदृष्टि-निवारणार्थं 'निमाइ' इति निम्बफलतिक्तितास्मारकं नाम कृतवती। गौरवर्णरूपलावण्यात् स गौरहरिर्गौराङ्गो वेत्यपि उच्यते। छात्रजीवने स विभिन्नशास्त्रेषु पाण्डित्यमर्जयित्वा ततः यौवने अध्यापकरूपेण सुप्रसिद्धोऽभवत्। किन्तु गार्हस्थ्यजीवने प्रवेशात् परं कियच्चन-कालानन्तरं पितृश्राद्धकरणार्थं गयां गत्वा ईश्वरपुरीमहोदयेन गोपालमन्त्रेण दीक्षितो भूत्वा ईश्वरप्रेमाभिभूत उन्मत्तप्रायः समभूत्। ईश्वरपुरी तावत् माधवेन्द्रपुरीमहोदयस्य प्रियशिष्य आसीत्। ततः स विश्वम्भरो गयातीर्थात् प्रत्यावृत्तः नवद्वीपे ईश्वरभक्ति-प्राबल्यात् अध्यापनकर्मणि पूर्ववत् मनोनिवेशं कर्त्तुं न शशाक। स भक्तिभावेन परिवर्त्तितनवमानवरूपेणैव नवद्वीपं प्रत्यावृत्तः। तत्र नवद्वीपे पूर्वस्मात् कालादेव ईश्वरप्रेमिणां वेष्णवानां काचिद् गोष्ठी आसीत्। तत्र त्रयो भक्ता मुख्या आसन् अद्वैताचार्य्यः, यवनो हरिदासः, श्रीवासपण्डितश्च इति। श्रीवासस्य त्रयो भ्रातरः मुरारिगुप्तः, सदाशिवपण्डितः, शुक्लाम्बरो ब्रह्मचारी इत्येते अपि आसन्। अत्र सुकण्ठो गायकश्चासन् मुकुन्ददत्तः। विश्वम्भरस्य भक्तिप्राबल्यमालोक्य एते सर्वे तं प्रति आकृष्टा अभवन्। विश्वम्भरश्च (निमाइ इतिनामधेयः) अध्यापनां त्यक्त्वा तेषां सन्निधाने हरिनामसंकीर्तने नामप्रचारे च तत्परोऽभूत्। इतः पूर्वमेव तस्य विवाहोऽभूत्



लक्ष्मीदेव्या सह, किन्तु सर्पदंशनेन तस्यां स्वर्गतायां मातुरिच्छाक्रमेण विष्णुप्रियां पत्नीरूपेण जग्राह। वस्तुतः गार्हस्थ्यं प्रति आकर्षणं तस्य शिथिलमभवत्।[8] नवद्वीपे तदानीं केचित् हरिनामसंकीर्तनस्य विरुद्धवादिनोऽपि अभवन्। अस्मिन् समये नित्यानन्दनामधेयः कश्चिदवधूतः नवद्वीपमागत्य तैः सह मिलितोऽभूत्। एवं सहयोगिनां साहाय्येन दलबद्धरूपेण हरिनामप्रचारे विश्वम्भरः किञ्चित् साफल्यमर्जितवान्। किञ्च तत्र अतीव दुराचारौ मद्यपौ द्वौ भ्रातरौ जगाइ माधाइ इतिनामकौ आस्ताम्। तयोरपि दुर्वृत्ततात्यागपूर्वकं हरिसंकीर्तने योगं कारयितुं समर्थोऽभवद् विश्वम्भरः। अनया घटनया विश्वम्भरस्य ख्यातिरपि विवर्धिता। भक्तास्तमेव ईश्वरज्ञानेन पूजितवन्तः, हरिनामप्रचारोऽपि अव्याहतो भवत्। "अभूद् गेहे गेहे तुमुलहरिसंकीर्तनरवः।" अस्मात् कारणात् हरिनामविद्वेषिण उद्विग्ना अभवन्। केचिद् विद्वेषिणः (विशेषतः मुस्लिमसम्प्रदायान्तर्गताः) नवद्वीपस्य काजीमहोदयस्य समीपं गत्वा नामसंकीर्तनवृत्तान्तं विज्ञापयन्तः अभियोगं कृतवन्तः।[9] तैश्चानुप्राणितः काजीमहोदयो नवद्वीपे उच्चस्वरेण हरिनामसंकीर्तनं निषिद्धवान्। किन्तु तं निषेधमविगणय्य विश्वम्भरो विशालकीर्तन-दलसमभिव्याहारेण नवद्वीपस्य पथि पथि शोभायात्रां कृत्वा बहिर्गत आसीत्। उच्चस्वरेण हरिनामापि अव्याहतमासीत्। अभूतपूर्वम् इदं विशालं हरिनामगायकदलमालोक्य भयेन काजीमहोदयः पूर्वकृतां निषेधाज्ञां प्रत्याहृतवान्। वस्तुतः दलबद्धभावेन प्रतिवादज्ञापनस्य इयं राजनैतिकपद्धतिः विश्वम्भरेण एव तदानीं प्रदर्शिता। तस्य स्वपक्षे बहव एव जनाः समागता आसन्, यतः चैतन्यप्रचारिता वैष्णवधर्मस्तेषां मनांसि आकृष्टवान्। किमत्र सामाजिकं कारणं तदपि सुधीभिश्चिन्तनीयम्। किन्तु तदालोचनात् पूर्वं चैतन्यजीवनवृत्तान्ते पुनरपि मनः किञ्चिद् निविश्यताम्।

पूर्वोक्तवृत्तादनन्तरं विश्वम्भरो गार्हस्थ्याश्रमं परिहृत्य केशवभारतीसमीपे सन्न्यासदीक्षां जग्राह। सुकौशलेन मातुः शचीदेव्या अपि अनुमतिं लब्धवान्। काटोयानामकस्थाने इयं दीक्षा संवृत्ता (1510 खृष्टाब्दे माघमासे)। एतस्मिन् एव समये विश्वम्भरस्य श्रीकृष्णचैतन्य इति सन्न्यासनाम कृतवान् केशवभारती। ततः कतिचित् दिनानि शान्तिपुरे अतिवाहयन् स मातुरिच्छया नीलाचलं ययौ पुरीस्थजगन्नाथदर्शनाय। ततः सार्वभौमभट्टाचार्य्यमपि वैष्णवमते निमग्नमकरोत्। ततः दक्षिणदेशं गत्वा रायरामानन्देन सह राधाकृष्णप्रेमतत्त्वं विचारितवान्। ततो दक्षिणदेशस्थानि बहूनि तीर्थक्षेत्राणि अवलोक्य

पुनः पुरीं प्रत्यावृत्तः सः। रामानन्दोऽपि वृत्तिं त्यक्त्वा पुरीमागत्य तत्सहवासी अभूत्। राज्ञः प्रतापरुद्रस्य गुरोः काशीमिश्रस्य उद्यानवाटिकायां चैतन्यदेवो वासकमरोत्।[10]

इतः परमपि चैतन्यदेवः शान्तिपुरमगच्छत्। क्रमेण रामकेलिं वृन्दावनं च गतवान्। अस्मिन्नवसरे रामकेलिग्रामे रूपसनातनौ तस्य दर्शनं प्राप्तवन्तौ। ततः प्रयागे वाराणस्यां कियन्तमपि कालं नीत्वा पुनः पुरीं प्रत्यावृत्तः चैतन्यदेवः। यत्र यत्र स गतवान् तत्र तत्रैव तस्य बहवो भक्ताः संवृत्ताः। तिरोधानात् पूर्वमष्टादशवर्षकालं स पुरीं त्यक्त्वा न कुत्रापि गतवान्। जयानन्दकृतचैतन्यमङ्गलानुसारेण इष्टकाघातेन पदक्षतजनितरोगप्रकोपात् स 1455 शकाब्दे (1533 खृष्टाब्दे) आषाढमासे परलोकमगच्छत्। बहवस्तु तदीयचरितकाराः तस्य तिरोभाववृत्तान्तं नोल्लिखितवन्तः।

उच्चनीचहिन्द्वहिन्दुमूर्खपण्डितनिर्विशेषेण सर्वेभ्य एव जनेभ्यः श्रीचैतन्यो भक्तिधर्मं प्रचारितवान्। वस्तुतः तस्मिन् समये यादृशी सामाजिकी परिस्थितिरुपलभ्यते तत्र एतादृश एव धर्मः प्रार्थित आसीत्। जनगणानां मनःसु प्रकृतधर्मपिपासा प्रचलित-ब्राह्मण्यधर्माचरणेन न निवृत्ता अभवत्। यतस्तादृशो धर्मः प्राणहीन इव आसीत्। मन्त्रतन्त्रानुष्ठानमेव केचित् धर्माचारममन्यन्त। क्रियाकाण्डसर्वस्वे धर्मे जनसाधारणानां हृदययोगोऽपि न संघटित आसीत्। तदानीं धर्मीयसमाजस्य परिस्थितिविषये वृन्दावनदासः श्रीचैतन्यभागवत[11] ग्रन्थे एवं स्पष्टं चित्रमुपस्थापितवान्। यथा–

**रमादृष्टिपाते सर्वलोक सुखे बसे। व्यर्थ काल याय मात्र व्यवहार बसे।**
**धर्मकर्म लोक सब एइ मात्र जाने। मङ्गलचण्डीर गीत करे जागरणे।।**
**दम्भ करि विषहरि पूजे कोन जन। पुत्तलि करये केह दिया बहुधन।।**

अर्थात् लक्ष्मीदेव्याः सुदृष्टिपातात् सर्वे लोकाः सुखेन वसन्ति, व्यवहाररसेनैव कालं नयन्ति च। धर्मकर्मज्ञानेन केवलं मङ्गलचण्डीगीतं कुर्वन्ति रात्रिजागरणपूर्वकम्। केचिद्वा सदम्भं विषहरिं पूजयन्ति। केचित् पुनर्बहुधनव्ययेन पुत्तलिकां निर्माय पूजयन्ति। तदिह सर्वत्र अर्थाद् एव समादरः व्यवहाररसश्च कालपायनोपायः, अज्ञतायाश्च प्राधान्यम्। प्रकृतधर्मस्य कीदृशं स्वरूपं भविष्यतीत्यत्र विषये कस्यापि सम्यग् धारणा नास्ति। किञ्च निम्नत्रिर्गीयाणां जनानां नास्त्येव उच्चवर्णब्राह्मणानां धर्मकर्मसु प्रवेशाधिकारः। निम्नवर्गीयहिन्दुभिः सह दरिद्राणां मुसलिम्धर्मीयजनानां च उच्चवर्णहिन्दूनां कर्मणि अंशग्रहणमपि कल्पनाबाह्यमासीत्। अर्थात् धर्मविषये साम्यदृष्टेः उदारमनोभावस्य



गन्धोऽपि नासीत्। श्रीचैतन्यदेवेन तु घोषितं **'चण्डालोऽपि द्विजश्रेष्ठो हरिभक्तिपरायणः।'** किञ्च यवनं हरिदासमपि श्रीचैतन्यदेवः हरिभक्तरूपेण सश्रद्धं गृहीतवान्। अतएव भक्तस्य जन्मगता जातिरपि न गण्या। बाह्याचारसर्वस्वे धर्मे तु हार्दिकभावस्य नितरामभाव एवासीत्। अस्मादेव कारणात् एतद् दृश्यते यत् स्वल्पेनैव कालेन बङ्गदेशमतिक्रम्य भारतवर्षस्य विभिन्नेषु प्रदेशेषु श्रीचैतन्यप्रवर्त्तितो वैष्णवधर्मः प्रसारितोऽभूत्। दिशि दिशि लोकाः सानन्दं तदीयवैष्णवधर्मे अनुप्राणितप्राणा अभवन्। उत्कलप्रदेशेपि स्वयं राजा प्रतापरुद्रोऽपि तदीयविशुद्धहृदयभावदर्शनात् तस्मिन् अनुरक्तोऽभवत्। रवीन्द्रनाथेन सुष्ठूक्तम्–बङ्गदेश आत्मानं यथार्थभावेन अनुभूतवान् वैष्णवयुगे। तदानीं स ईदृशं गौरवं प्राप्तवान् यत् खलु अलोकसामान्यम्। तच्च विशेषरूपेण बङ्गदेशस्यैव।[12] चैतन्यदेवस्य तिरोधानादनन्तरमपि तत्प्रचारितभक्ति-धर्मधारा तदनुगामिनां प्रयत्नेन अद्यापि प्रवहति। किन्तु बङ्गसाहित्यक्षेत्रे चरितग्रन्थ-रचनायाः धारा अस्मादेव प्रारब्धा। बङ्गसाहित्ये मनुष्यजीवनमादाय ग्रन्थरचना ततः समारब्धा। श्रीचैतन्यो भक्तानां दृष्ट्या कृष्णावताररूपेण स्वीकृतः। कीर्तनगाने नूतनं तात्पर्य्यं गौरचन्द्रिकादिभिः आविष्कृतम्। संस्कृतसाहित्येऽपि रूपगोस्वामिप्रभृतिभिः नूतनमादर्शं पुरस्कृत्य नाटकादीनि रचितानि। नूतनतरदृष्ट्या वैष्णवरसतत्त्वम् अलङ्कारशास्त्रञ्च आलोचितम्। वेदान्तस्य नूतनं भाष्यं रचितं बलदेवविद्याभूषणेन। गोस्वामिभिः भक्तिसन्दर्भादिकं रचितम्। अतएव तेषां दर्शनस्य गौड़ीयवैष्णवदर्शनमिति आख्या सञ्जाता। सामाजिकव्यवहारक्षेत्रेऽपि वैष्णवपण्डितैः नूतनं वैष्णवस्मृतिशास्त्रं रचितम्।[13] (यथा गोपालभट्टस्य हरिभक्तिविलासः, तत्र नारीणां शूद्राणाञ्च शालग्रामपूजनं स्वीकृतम्।) एवं दृश्यते चैतन्यप्रवर्त्तितवैष्णवधर्मेण समग्रो देश एव आन्दोलित इवाभवत्। अतो यथार्थमुक्तं सुकुमार सेनमहोदयेन–इदमेव वङ्गीयजातेः प्रथमं जागरणम् इति। यद्यपि नाम परवर्तिनि काले अयं भक्तिधर्मोऽपि विभिन्नरूपतामलभत-बहूनामाचार्य्याणां प्रभावेण प्रचलितवैदिकस्मृतितन्त्रादिधर्मेण सह समन्वयप्रयासोऽपि लक्ष्यते–तथापि अस्य धर्मस्य सामाजिकः प्रभावः सुतरां स्वीकर्त्तव्यः।

❖

## सन्दर्भाः


1. ऋग्वेदः 1.22.20
2. गीता 4.8
3. श्रीमद्भागवतम् 1.3.28
4. छान्दोग्योपनिषद् 3.17.6
5. इतिहासेर दृष्टिते कृष्णचरित (बङ्गभाषायाम्), पृ.171–172, डॉ. अतुलचन्द्र चक्रवर्ती
6. 'कवि जयदेव ओ गीतगोविन्द' (बङ्गभाषायाम्), भूमिका पृ.20 हरेकृष्णसाहित्यरत्नः
7. भक्तमालग्रन्थस्य बङ्गानुवादस्य टीका।
8. 'जीवन थेके जीवनी' (बङ्गभाषायाम्) रविरञ्जन चट्टोपाध्यायः
   महाप्रभु श्रीचैतन्य (प्रबन्धसङ्कलनम्) सं. साधन दासगुप्तः
9. चैतन्यचरितामृतम्, कृष्णदासकविराजः, आदिलीला
10. श्रीचैतन्यभागवतम्, आदिलीला, प्र. रिफ्लेक्ट
11. श्रीचैतन्यभागवतम्, आदिलीला, प्र. टिफ्लेक्ट
12. रवीन्द्रनाथकृतः प्रबन्धः, वैष्णवकविप्रसङ्गः, सं. देवनाथवन्द्योपाध्यायः
13. वङ्गे वैष्णवधर्म (वङ्गभाषायाम्)। अध्यायः 5, रमाकान्त चक्रवर्ती


❖



# महाकविरत्नाकरविरचिते 'हरविजय' महाकाव्ये रसपरिपाकः

**डॉ. अनिल कुमार मिश्रः**

महाकविरत्नाकरविरचिते हरविजयमहाकाव्ये पञ्चाशत् सर्गाः ४३२९ श्लोकाश्च सन्ति। यद्यपि अस्य कथावस्तु पुराणोद्धृतं सक्षिप्तञ्च तथापि विस्तरं कृत्वा महाकाव्यरूपेण उपस्थापितमस्ति। अस्य महाकाव्यस्य प्रतिसर्गं प्रतिश्लोकं च रसयोजना कवेः विभिन्नान् रसान् प्रत्याकर्षणं दर्शयति।

वर्ण्यविषयदृष्ट्या शीर्षकेण च 'हरविजयमहाकाव्ये' वीररसस्य प्राधान्यं ज्ञाप्यते। वीररसे दानवीरः दयावीरः युद्धवीरश्चेति त्रयो भेदाः सन्ति। एतेषु त्रिष्वपि भेदेषु अत्र 'युद्धवीर' इत्यस्यैव वर्णनमस्ति। वीररसस्य वर्णनम् अस्मिन् महाकाव्ये षोडशे सर्गे अथ च चतुर्विंशतिसर्गतः एकोनपञ्चाशत् यावत् सर्वेषु दृश्यते।

काव्येऽस्मिन् वीररसस्य उदाहरणविशेषे उच्यते– यथा राहोः सिंहस्य च पुरतः वानरः स्थातुं न शक्नोति तथैव शत्रुरपि मम पुरतः स्थातुं न शक्नोति, तद्यथा–

**सिंहीसुतस्य समरे सहसोत्थितस्य**
**शक्ताः कथंचन विलोलदृशः पुरस्तात्।**
**स्थातुं निसर्गतरला बत वीतशोक–**
**माचक्ष्व दूत यदि वः प्रथमप्लवङ्गाः।।**[1]

महाकविः स्वकीये 'हरविजय' नामके महाकाव्ये यं कमपि रसं सृष्टवान् अस्ति तस्य सम्यक् परिपोषं कृतवान् अस्ति।

एतस्मिन् प्रसङ्गे बीभत्सरसस्य एकं सुन्दरमुदाहरणं द्रष्टुं शक्यते–

**चामुण्डया परुषभस्मपरागपूर्ण-**
**माकीर्णमस्थिशकलैः सकपालखण्डम्।**

बिभ्राणया वपुरधिष्ठितमीश दूर–
मेतच्छ्मशानगृहदेवतयेव सैन्यम्।।[2]

महाकविः रत्नाकरः स्वकीये ग्रन्थे अद्भुतरसस्याद्भुतं प्रयोगं कृतवान् अस्ति। तद्यथा–

प्रत्यक्षमेव भवतामविरुणमौर्वी-
शाखाकृतास्पदविचित्रपतत्रिचक्राः।
कोदण्डतालतरवोऽप्यधुना दिशन्ति
यच्छ्रीफलं रिपुजनस्य महाद्भुतं तत्।।

उपर्युक्तेऽस्मिन्नुदाहरणे तालवृक्षः बिल्वफलं वितरतीति एतद् वैचित्र्यं तस्माच्च आनन्दस्याप्यनुभूतिः भवति।

प्रायशः एवं दृश्यते यत् वीररसप्रधानकाव्येषु शान्तरसस्य वर्णनं न लभ्यते, तथापि स्वकीयं पाण्डित्यं दर्शयितुम् एतस्मिन् महाकाव्ये शान्तरसस्यापि वर्णनं कृतं दृश्यते–

दुःखं न किंचिदपरं पुरुषत्वहाने–
र्युद्धे मुधा समुदयोऽत्र चमूचराणाम्।
मार्गोऽयमेव भवतां ननु शान्तिहेतु–
र्योऽरेर्जयश्रिय इव क्रियतेऽवरोधः।।[3]

युद्धस्य अत्यधिकं वर्णनम् अत्र दृश्यते एतस्मात्कारणात् एतस्मिन् महाकाव्ये भयानकरसस्य रौद्ररसस्य च वर्णनमधिकं लभ्यते। भयानकरसोपेतः असौ श्लोकः दर्शनीयोऽस्ति यत्र दैत्यसेना भगवन्तं शङ्करं प्रार्थयति यत् भयं नाशयित्वा अभयं प्रदातव्यमिति–

गणसेनया प्रतिदिशं तरसा प्रथमानया सममया न ततम्।
अभयं सुरारिपृतना समिति प्रथमानया सममयाचत तम्।।[4]

रौद्ररसस्यापि एकमुदाहरणमत्र द्रष्टव्यमस्ति–

विकतमुखविषाणादभ्रमाराण्यवांचि
प्रसभमिहतानामुत्तमाङ्गानि पूर्वम्।



गिरिभुवि हरिणानामाशु पश्चाद्वपूंषि
स्रुतरुधिरलघूनि व्योममार्गान्निपेतुः।।[5]

नवसु रसेषु शृङ्गाररसः प्रधानोऽस्ति। एष त्रिप्रकारको भवति। 1. अयोगशृङ्गरः, 2. सम्भोगशृङ्गारः संयोगशृङ्गारो वा 3. वियोगो विप्रलम्भो वा।

एतस्मिन् हरविजयनामके महाकाव्ये अयोगशृङ्गारस्य अवसरः एव नास्ति यतो हि अत्र पूर्वपरिचयं विहाय शृङ्गाररसस्योत्पत्तेः औचित्यं नास्ति। अवशिष्टयोः संयोगवियोगयोः पर्याप्तानि उदाहरणानि उपलभ्यन्ते। शृङ्गाररसं प्रति कवेः आकर्षणम् एतेनैव ज्ञातुं शक्यते यत् संयोगशृङ्गारमवलम्ब्य कविना सम्पूर्णः सप्तविंशतितमः सर्गः आरचितः।

कामदेवः स्वकीयैः पुष्पनिर्मितैः बाणैः कामिनीनां हृदयानि विदारितवान् अस्ति। तस्य धनुषि निगूहितानां भ्रमरवृन्दानां गुञ्जनं चित्तमाकर्षति, धनुषः टङ्कारनादः चित्तं हरति च–

आकृष्यमाणमथ पुष्पशरासनेन
संरभ्य कामिहृदयानि बिभित्सतारात्।
लीनद्विरेफकुलझांकृतिचित्तहारि
टङ्कारनादमुखरस्थिति चापमासीत्।।

संयोगस्य वर्णनमिव शृङ्गाररसस्य द्वितीयपक्षस्य वियोगस्यापि अत्यन्तं सम्मोहकं वर्णनं रत्नाकरः कविः कृतवान् अस्ति। यथा कविः संयोगशृङ्गाराय पृथक्त्वेन एकस्य सम्पूर्णसर्गस्य योजनां महाकाव्येऽस्मिन् अकरोत् तथैव वियोगशृङ्गाराय अपि पृथक्त्वेन चतुर्विंशतितमसर्गस्य योजनमकरोत्।

प्रियस्य वियोगे विरहिण्यः कामिन्यः सन्ध्याकालेन सह कुटिलां चन्द्रकलां दृष्ट्वा अतीव भीताः भवन्ति। ताः अनुभवन्ति यत् कामदेवः स्वकीयैः कुटिलैः बाणैः तान् मारयितुं सिद्धोऽस्तीति–

स्मरकार्मुकयष्टिविभ्रमं कुटिला चान्द्रमसी कलावहत्।
दधति स्म तदीरिताः शरा इव तन्व्यास्तदभीषवो व्यथाम्।।[6]

एतस्मिन् महाकाव्ये हास्यरसाय कोऽपि अवसरः नास्ति। तथापि एतन्–महाकाव्यस्योत्कृष्टम् उदाहरणं भवत्विति धिया हास्यरसस्य सन्निवेशः अत्र कृतः।

अस्य महाकाव्यस्य चतुस्त्रिंशत्तमे सर्गे, अन्धकासुरस्य सभायां क्षोभस्य वर्णनं कृतमस्ति, तत्र हास्यरसस्य पर्याप्तानि उदाहरणानि उपलभ्यन्ते। तद्यथा–

निष्ठ्यूतया कवलितामृतधारयेव
वक्रान्तरालभुवि भूरिभरादमान्त्या।
तस्यातिनिष्ठुररुषो विकटाट्टहास–
भासावभासितसभाभवनं बभासे।।[7]

यद्यपि हास्यरसस्येव 'हरविजय' महाकाव्ये करुणरसस्य तावत् प्रसन्नतोत्पादकं वर्णनं न लभ्यते तथापि हास्यरसस्य अपेक्षया करुणरसस्य वर्णनं प्रशस्तम् अस्ति। युद्धवर्णनप्रसङ्गेषु करुणरसस्य सन्दर्भः स्वाभाविकरीत्या आगच्छति। अन्धकासुरेण सह वार्तालापस्यावसरेऽपि एते सन्दर्भाः अनायासेनागच्छन्ति।

उदाहरणाय पञ्चत्रिंशत्तमसर्गस्य पञ्चमः श्लोकः अत्र द्रष्टुं शक्यते। यत् करुणरसमुत्पादयति–

अद्यैव तेऽस्तु निधनं सदसीत्यशक्तं क्लिष्टाक्षरं निगदतः क्रमयोगशून्यम्।
संतर्जयत्सु तरलीकृततर्जनीकमित्थं गणाधिपातिमाह वटुर्मदेषु।।[8]

यद्यपि उपरिवर्णितेषु नवसु रसेषु प्रतिरसं प्रयोगकर्तॄणां महाकवीनाम् अनेकानि महाकाव्यानि संस्कृतसाहित्ये निर्दिष्टानि सन्ति तथापि हरविजयमहाकाव्यस्य रचयितुः महाकावेः रत्नाकरस्य केनापि रसेन सम्बद्धं कर्मापि श्लोकं पृथक्तया पठामश्चेत् ज्ञायते यत् अयं महाकविः महाकाव्ये एतस्यैव रसस्य प्रयोगं कृतावन् अस्ति इति।

❖

## सन्दर्भाः


1. हरविजयः 34.5
2. हरविजयः 39.46
3. हरविजयः 45.32
4. हरविजयः 46.5
5. हरविजयः 41.24
6. हरविजयः 24.2
7. हरविजयः 34.13
8. हरविजयः 35.5


❖



# वाल्मीकिरामायणीयबालकाण्डापेक्षं परवर्तिप्रसिद्धरामनाटकानां समीक्षणम्

डॉ. कामेश्वर शुक्लः

सुविपुले संस्कृतवाङ्मये रसभावभाषालङ्कारालङ्कृतं वाल्मीकीयरामायणं कस्य सचेतसः चेतो न आह्लादयति। आदिकाव्यमिदं कवीनामाधारं प्रसेत्स्यतीति निगदितं वर्तते।[1] बृहद्धर्मपुराणे महाकाव्यमिदं काव्येतिहासपुराणादीनां मूलं स्रोतः स्वीकृतमस्ति।[2] रामायणोत्तरकाले रामकथाश्रितेषु नाटकेषु यद्यपि मूलतः रामायणीयं कथानकम् आधारभूतम् अस्ति तथापि तत्तद्रामायणीयप्रसङ्गेषु विविधं परिवर्तनं संस्करणं च स्थानम् अलभतैव।

महावीरचरिते वालिवधः, अनर्घराघवे महानाटके च परिवर्तितं रूपम्, प्रतिमानाटके महावीरचरिते अनर्घराघवे बालरामायणे च कैकेय्याः दोषनिवारणम्, छलितरामे सीतात्यागः, कृत्यारावणे सीताहरणं च आदर्शवादप्रभावेण नवीनं रूपम् धारयन्तीव प्रतिभान्ति। बालरामायणे वर्णितं रावणस्य विरहवर्णनं, मैथिलीकल्याणे सीतारामयोः पूर्वानुरागचित्रणं, महानाटके सीतारामयोः संभोगवर्णनं च शृङ्गारव्यापकतां व्यनक्ति। एवमेव प्रसन्नराघवस्य षष्ठाङ्के आश्चर्यचूडामणौ च क्वचित् क्वचित् अद्भुतरसस्य सन्निवेशः प्रकाशमायाति। उदाहरणार्थमभिनेतॄणां नाटकीयपात्राणां वा अन्यरूपधारणं यथा–महावीरचरिते अनर्घराघवे च शूर्पणखा मन्थरायाः रूपं धारयति। उदात्तराघवे सुग्रीवं वञ्चयितुमेको राक्षसो हनुमतो रूपं धृत्वा तत्सकाशमागच्छति, अन्तिमाङ्के च अनेके छद्मवेशिनो राक्षसाः रामभरताभ्यां सार्द्धं छलं कपटञ्च विधातुं निष्फलं प्रयासं कुर्वन्ति। बालरामायणे मायामयः दशरथस्य, शूर्पणखा कैकेय्याः एका परिचारिका च मन्थराया रूपं धारयतः। महानाटके रावणः स्वहस्तयोः आत्मनो दश शिरांसि

आदाय रामस्य रूपञ्च धृत्वा सीतासकाशमायाति। आश्चर्यचूड़ामणौ रावणः तस्य सारथिश्च रामलक्ष्मणयोः रूपं धृत्वा सीतां हरतः, शूर्पणखा च सीतायाः रूपं निर्माय राममुपयाति।

लघुकायेऽस्मिन् प्रबन्धे सर्वेषां रामनाटकानां समीक्षणं तु असम्भवमेव, सर्वं कथानकमपि समीक्षितुं न शक्यते। अतः वाल्मीकिरामायणस्य बालकाण्डमेव उररीकृत्य कतिपयानां सुप्रसिद्धरामनाटकानां वृत्तान्तजातं कथानकगतं घटनासंवृत्तं च समीक्षणमेवात्र विहितं वर्तते। अत्रेदमपि प्रणिधानयोग्यं यत् वाल्मीकीयरामायणस्य पाठो नैकरूपतां भजते। सम्प्रति अस्य त्रयः पाठाः प्रचलिताः सन्ति-दाक्षिणात्यपाठः, गौडीयपाठः पश्चिमोत्तरीयपाठश्च। प्रत्येकं पाठे ईदृशाः अनेके श्लोकाः वर्तन्ते येषामन्यपाठेषु उल्लेखो नास्ति। अतः पाठकैः समीक्षकैश्चैतदवश्यं ध्यातव्यम्।

**अहल्योद्धारः**-बालकाण्डस्य अष्टचत्वारिंशे वृत्तान्ते गौतमः अहल्यामादिशति यत् सा अदृश्या सती यावत् रामः नायाति तावत् तपस्यां कुर्यात्।[3] सा तपस्यारता भवति। विश्वामित्रमुखात् कथामिमां श्रुत्वा रामलक्ष्मणौ आश्रमं प्रविशतः। शापावधिरपि तदानीमेव समाप्तो भवति। अतः अहल्यादर्शने समर्थौ तौ ऋषिपत्न्याः पादौ स्पृशतः।[4] किन्तु परवर्तिरामनाटकेषु पाषाणभूतायाः अहल्यायाः वर्णनमुपलभ्यते यत्र रामः स्वचरणस्पर्शेन पाषाणभूतां तां पुनर्जीवयति। महानाटके उदारराघवे च पाषाणभूतायाः अहल्यायाः वर्णनं प्राप्यते। उदारराघवस्यानुसारं (3, 29-41) रामस्य चरणस्पर्शात् शिलातः स्त्रिया उत्पत्तिं विलोक्य यदा विश्वामित्रः उभौ राजकुमारौ च विस्मिताः भवन्ति तदा अहल्या आत्मनः कथां श्रावयति, सीतारामयोः परिणयस्य भविष्यवाणीं विदधाति, रामलक्ष्मणौ च मिथिलां नेतुं प्रार्थयति। महानाटके तु तृतीयाङ्कानुसारम् अगस्त्याश्रमात् निर्गमात् परम् अहल्योद्धारस्य वर्णनमुपलभ्यते। गौतमस्य "स्वं वपुर्धारयिष्यसि" इति वाक्यांशहेतोः धारणैषा समजायत यत् शापग्रस्ता अहल्या शिलासंवृत्तेति समीक्षकाणामभिमतम्।

**परशुरामस्य तेजोभङ्गः**-वाल्मीकेः रामायणानुसारं रामपरशुरामयोः संघर्षस्य कारणमेतद् यद् क्षत्रियविरोधी परशुरामः दाशरथेः रामस्य पराक्रमं तद्द्वारा विहितं धनुर्भङ्गञ्च विज्ञाय तेन सह द्वन्द्वयुद्धं चिकीर्षति। सः विष्णुचापमादाय आगच्छति तथा च रामं कथयति यत् विष्णुचापमिदमारोप्य स्वबलं प्रतिद्वन्द्वितां च प्रदर्शयेदिति।[5]



परन्तु रामनाटकेषु शिवस्य शिष्यरूपेण वर्णितः आख्यातो वा परशुरामः स्वगुरुं प्रति विहितस्यानादरस्य प्रतिकारार्थमागच्छति। महावीरचरिते एष उल्लेखः लभ्यते यत् माल्यवाननामकेन रावणमन्त्रिणा प्रेरितो जामदग्न्यः हरचापभञ्जकस्य रामस्य दमनार्थं मिथिलां प्राप्नोति।[6] एवमेव अनर्घराघव-बालरामायण-महानाटकादिपरवर्तिरामनाटकेषु परशुरामः शिवशिष्यरूपेण शैवसंन्यासिरूपेण वा बहुधा चित्रितो वर्तते।[7] प्रसन्नराघवे तु धनुर्भङ्गात् पूर्वमेव परशुरामदूतः आगत्य जनकं विनिवेदयति यत् हरचापस्य अनादरः न स्यादिति।[8] रामपरशुरामयोः युद्धवर्णनमपि वाल्मीकियरामायणे नाधिगम्यते किन्तु महावीरचरितस्य तृतीयाङ्के,[9] अनर्घराघवस्य चतुर्थाङ्के,[10] प्रन्नराघवस्यापि चतुर्थाङ्के[11] रामः परशुरामश्च युद्धाय रङ्गमञ्चात् निर्गच्छन्तौ संलक्ष्येते।

वाल्मीकीयरामायणे रामादीनां चतुर्णां भ्रातॄणां विवाहात् परं अयोध्यायात्राप्रसङ्गे परशुरामस्यागमनं वर्णितं विद्यते।[12] महावीरचरित-महानाटकानर्घराघव-बालरामायण-प्रसन्नराघवादिपरवर्तिनाटकेषु मिथिलायामेव परशुरामस्यागमनप्रसङ्गः उत्थापितः आख्यातश्चास्ति। बालरामायणानुसारं सीतारामयोः विवाहात् परं दशरथः परशुरामश्च मिथिलां प्राप्नुतः तथा च विश्वामित्रस्यादेशमधिगम्य लक्ष्मणः एव नारायणीयं धनुः प्रत्यारोपयति।[13]

रामपरशुरामयोः वाग्युद्धस्य विस्तृतं वर्णनं प्रसङ्गस्यास्य प्रमुखतया उपस्थापन-मेतेषां नाटकानां वृत्तान्तगतम् अपरं वैशिष्ट्यं वर्तते। महावीरचरित-प्रसन्नराघवादिषु क्रुद्धः जामदग्न्यः वारं वारं रामवधाय तर्जयति।[14] प्रस्तुतप्रसङ्गस्य प्रारम्भिकवर्णनानुसारं लक्ष्मणः प्रसङ्गेऽस्मिन् भागं न गृह्णाति। प्रसन्नराघवस्य लक्ष्मणः रामपरशुरामयोः वाग्युद्धे सम्मिलितः सन् परशुरामं तिरस्करोति।[15]

**पूर्वानुरागः**-परवर्तिनाटकेषु बहुधा वर्णितः सीतारामयोः पूर्वानुरागः अपि वाल्मीकिरामायणे नोपलभ्यते। रामभद्रदीक्षितप्रणीतस्य जानकीहरणस्य सप्तमसर्गे धनुर्भङ्गात् परं किन्तु विवाहात् पूर्वं सीतायाः विरहवर्णनं तथा च अस्यैव नाटकस्य अष्टमे सर्गे महानाटकस्य द्वितीयाङ्के च विवाहात् परं सीतारामयोः संभोगस्यापि वर्णनमुपलभ्यते। महावीरचरितस्य द्वितीयाङ्के विश्वामित्रस्याश्रमे समागतयोः रामलक्ष्मणासक्तयोः सीतोर्मिलयोः वर्णनं प्राप्यते। महानाटकस्य प्रथमाङ्के धनुषः कठोरतां रामस्य कोमलताञ्च वीक्ष्य सीता पितुः प्रतिज्ञां प्रति खेदं प्रकटयति तथा

च धनुर्भङ्गात् परं रामः प्रेमविह्वलायाः सीतायाः स्मितपूर्णं मुखं विलोकयति। सीतारामयोः पूर्वानुरागचित्रणे कैश्चित् कविभिः पुष्पवाटिकायां तयोः साक्षात्कारस्य अभिनवकल्पना कृता वर्तते। प्रसन्नराघवे विटपान्तरितः रामः सखीभिः सह चण्डिकायतनं प्रति गच्छन्तीं सीतां विलोकयति तथा च तासां पारस्परिकं वार्तालापमाकर्णयति। पश्चात् उभावपि परस्परमासक्तौ भवतः।[16]

**सीतास्वयंवरः**—सीतास्वयंवरस्योल्लेखं कुर्वता वाल्मीकिना निगदितमस्ति यत् अवसरेऽस्मिन् समुपस्थिताः भूपतयः शिवधनुषः आरोपणे असमर्थाः सन्तः मिथिलायाः उपरि आक्रमणं कृतवन्त आसन्। अस्याः घटनायाः बहुकालानन्तरं रामेण धनुर्भङ्गः कृतः तथा च सीतया सह तस्य विवाहः सम्पादितः आसीत्। वाल्मीकिरामायणानुशीलनेन इदमपि ज्ञायते यत् जनकस्य यज्ञावसरे विश्वामित्रः रामलक्ष्मणाभ्यां सह मिथिलां गच्छति शिवधनुश्च दर्शयितुं जनकं निवेदयति।[17] परवर्तिरामनाटकेषु सीतास्वयंवरः राज्ञामाक्रमणञ्चेति घटनाद्वयस्यापि सम्बन्धः रामेण सह स्थापितो वर्तते। अतएव सीतास्वयंवरे रावणदूतस्य रावणस्य वा आगमनम् अर्वाचीननाटकेषु प्रायः दृष्टिपथमायाति। महावीरचरिते तु विश्वामित्रस्याश्रमे एव एष प्रसङ्गः उत्थापितः विद्यते।[18] नाटकेऽस्मिन् रावणः स्वीयम् एकं दूतं सम्प्रेष्य सीतां याचते।[19] रामश्च धनुर्भङ्गं विदधाति। अनर्घराघवे रावणदूतः शौष्कलः मिथिलामागत्य धनुषः परीक्षा न रावणयोग्येति प्रलपन् रावणस्य पक्षतः सीतां याचमानः दृश्यते।[20] प्रसन्नराघवे रावणः बाणासुरश्च उभावपि धनुषः आरोपणाय निष्फलं प्रयत्नं कुरुतः तथा च खिन्नो रावणः सीताहरणस्य संकल्पं विधाय ततः निर्गच्छति।[21] बालरामायणेऽपि रावणस्यात्र उपस्थितिः परिलक्ष्यते। महानाटकेऽपि रावणस्यात्र उपस्थितिः परिलक्ष्यते। महानाटकेऽपि प्रसङ्गेऽस्मिन् रावणदूतस्य वर्णनमुपलक्ष्यते।[22]

तदित्थमुक्तवर्णनेन एतद् निश्चप्रचं यत् परवर्तिनाटकेषु वाल्मीकीयरामायणस्य मूलकथानकं सर्वथा परिवर्द्धितं परिवर्तितञ्च विद्यते। अस्य कारणं विविच्यते चेत् अवतारवादस्य क्रमिकः विकासः एवात्र मुख्यत्वेन दृष्टिपथमायाति। नाटकेभ्यः नाटकीयरूपप्रदानं, लोकानुरञ्जनं, देशकालप्रभावः, भावसादृश्यग्रहणं, प्रतिभाप्रदर्शनं, रचनायै नवीनत्वप्रदानं चाप्यत्र कारणत्वेन निर्दिश्यते। विषयेऽस्मिन् आनन्दवर्धनाचार्यस्य राजशेखरस्य चोक्तिः विचारणीया।[23] भक्तिभावे सुविकसिते पल्लविते पुष्पिते च



सति नारायणावतारः रामः परब्रह्मणः पूर्णावतारः, लक्ष्मणः शेषावतारः, भरतः शङ्खावतारः, शत्रुघ्नश्च सुदर्शनावतारोऽभिमतः[24] रामभक्तेः प्रादुर्भावात् परं लक्ष्म्याः अवतारभूता सीता परमशक्तिस्वरूपा मूलप्रकृतिस्वरूपा वा बभूव।[25] अध्यात्म-रामायणस्य अयोध्याकाण्डस्य प्रथमसर्गे रामः विष्णोः शिवात् ब्रह्मणः सूर्याच्च सर्वथा अभिन्नत्वेन आख्यातो वर्तते। तदनुसारं सीता एव क्रमशः लक्ष्मी–पार्वती–सरस्वती–प्रभृतिरूपैः अवतरिता भवति।[26] पद्मपुराणे रामशिवयोः अभिन्नतां प्रदर्शयत् रामस्य कथनमप्यत्रोल्लेख्यतामर्हति।[27]

भक्तिभावहेतोः रामकथायाः आधिकारिककथावस्तुन्यपि महत्त्वपूर्णं परिवर्तनमजायत। सीता रावणवशीभूता संजाता आसीदिति विचारः भक्तेभ्यः असह्यः संवृत्तः। अतः उपास्यदेव्याः मर्यादारक्षणार्थं भक्तिभावेन सीतायाः छायारूपस्य हरणमङ्गीकृतम्। सीतात्यागोऽपि अयथार्थ एव कल्पितः। किन्तु सत्स्वपि बहुषु परिवर्तनेषु सीतायाः पातिव्रत्यं, रामस्याज्ञापालनं, भरतलक्ष्मणयोः भ्रातृप्रेम, कौशल्यायाः वात्सल्यं, दशरथस्य सत्यसन्धतादयः ये उच्चादर्शाः ते प्रायः सर्वेष्वपि नाटकेषु दृग्गोचराः भवन्ति तत्पाठकान् चानुप्राणयन्ति, स्वान्तं शोधयन्ति सन्मार्गञ्च प्रदर्शयन्ति।

❖

## सन्दर्भाः


1. परं कवीनामाधारं समाप्तं च यथाक्रमम्।
   अभिगीतमिदं गीतं सर्वगीतिषु कोविदौ।। बालकाण्डः 4.27

2. रामायणं महाकाव्यमादौ वाल्मीकिना कृतम्।
   तन्मूलं सर्वकाव्यानामितिहासपुराणयोः।।
   संहितानां च सर्वासां मूलं रामायणं मतम्।
   तदेवादर्शमाराध्य वेदव्यासो हरे कला।।
   चक्रे महाभारताख्यातमितिहासं पुरातनम्।। बृहद्धर्मपु.,पूर्व.अ.25-28,29

3. इह वर्षसहस्राणि बहूनि निवसिष्यसि।

वातभक्षा निराहारा तप्यन्ती भस्मशायिनी।

अदृश्या सर्वभूतानामाश्रमेऽस्मिन् निवत्स्यसि।।

यदा त्वेतद् वनं घोरं रामो दशरथात्मजः।

आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि।।

तस्यातिथ्येन दुर्वृत्ते लोभमोहविवर्जिता।

मत्सकाशं मुदा युक्ता स्वं वपुर्धारयिष्यसि।। बाल.,48-49,30-32

4. शापस्यान्तमुपागम्य तेषां दर्शनमागता।

राघवौ तु तदा तस्याः पादौ जगृहतुर्मुदा।। बाल. 49.16-17

5. राम दाशरथे वीर वीर्यं ते श्रूयतेऽद्भुतम्।

धनुषो भेदनं चैव निखिलेन मया श्रुतम्।।

तदद्भुतमचिन्त्यं च भेदनं धनुषस्तथा।

तच्छ्रुत्वाहमनुप्राप्तो धनुर्गृह्यापरं शुभम्।।

तदिदं घोरसंकाशं जामदग्न्यं महद्धनः।

पूरयस्व शरेणैव स्वबलं दर्शयस्व च।।

तदहं ते बलं दृष्ट्वा धनुषोऽप्यस्य पूरणे।

द्वन्द्वयुद्धं प्रदास्यामि वीर्यश्लाघ्यमहं तव।। बाल.75, 1-4

6. (अ) यदि प्रपद्येत धनुः प्रमाथौ शिष्यस्य शम्भोर्न तितिक्षते सः।

आयोधने चेदुभयोर्निघातः संरम्भयोगादति हि प्रियं नः।।

(ब) त्वां पृच्छञ्जामदग्न्यः स्वगुरुहरधनुर्भङ्गरोषादुपैति।। महा. 2.12,17

7. आः क्षुद्रक्षत्रियडिम्भ कथं प्रमथनाथप्रथमान्तेवासिनं

परशुराममपि भवान्नाजीगणत्। अनर्घ. 4.32

8. कस्मैचिद् देहि कन्यां नरपतिशिशवे दीर्घमायुर्लभस्व।

व्यावर्त्तस्वाप्रियान्नः पुरमथनधनुःकर्षणालापपापात्।। प्रसन्न. 3.38



9. एहि मन्ये राजपुत्र जामदग्न्यं विजेष्यसे। (सस्मितम्) नहि

विजेष्यसे। दुर्दान्तो हि रेणुकातनयस्त्वदन्तकः। तथाहि-कृत्त-

क्षत्रियकण्ठकन्दरसरत्कीलालनिर्वापित. . . . । महा. 3.48

10. भार्गव समन्तादुद्घातिनी भूमिरियम्। तदेहि, विमर्दक्षमं

प्रदेशान्तरमवतरावः। अनर्घ. 4.56

11. तदेहि, वाष्पायमाणभवद्बन्धुजनबन्धुरामतिक्रम्य

समताक्षमां क्षमामवतरावः। प्रस. 4.42

12. एवमुक्त्वार्घ्यमादाय भार्गवं भीमदर्शनम्। बाल. 74.22

13. बालरामायणम् (4.75), महावीरचरितम्, 2.23, 3.16

14. प्रसन्नराघवम्, 4.19, 22, 34, 36

15. प्रसन्नराघवम्, 4.25, 27

16. प्रसन्नराघवम्, (द्वितीयाङ्कः द्रष्टव्यः)

17. धनुर्दर्शय रामाय इति होवाच पार्थिवम्। बाल. 66.1

18. महावीरचरितम् (प्रथमाङ्कः द्रष्टव्यः)

19. मातामहेन प्रतिषिध्यमानः स्वयंग्रहान्माल्यवता दशास्यः।

अयोनिजां रजसुतां वरीतुं मां प्राहिणोन्मैथिलराजधानीम्।। महा. 1.28

20. कन्यामयोनिजन्मानं वरीतुं प्रजिघाय माम्।

पुरोधसा गौतमेन गुप्तस्य भवतो गृहात्।। अनु. 3.42

21. (अ) लङ्कां नयामि च गिरानुनयामि चैनां

द्रागानयामि च वशे जनकेन्द्रपुत्रीम्।। प्रसन्नराघवम् 1.55

(ब) अनाहृत्य हठात् सीतां नाऽन्यतो गन्तुमुत्सहे। प्रस. 1.60

22. महानाटकम्, 1.21.22

23. (अ) दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।

सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः।

(ब) शब्दार्थोक्तिषु यः पश्येदिह किञ्चन नूतनम्।

उल्लिखेत् किञ्चन प्राच्यं मन्यतां स महाकविः।।

24. शङ्खो बभूव भरतः श्रीविष्णोः सव्यसत्करे।
वामे करे बभूवाथ शत्रुघ्नश्च सुदर्शनम्।। आनन्दरामायणम्, 9.6.16

25. एषा सा जानकी लक्ष्मीर्योगमायेति विश्रुता।
मूलप्रकृतिरित्येके प्राहुर्मायेति केचन।। अध्यात्मरामा. 2.5, 3.3

26. त्वं विष्णुर्जानकी लक्ष्मीः शिवस्त्वं जानकी शिवा।
ब्रह्मा त्वं जानकी वाणी सूर्यस्त्वं जानकी प्रभा।।13

27. ममास्ति हृदये शर्वो भवतो हृदये त्वहम्।
आवयोरन्तरं नास्ति मूढा पश्यन्ति दुर्धियः।।
ये भेदं विदधत्यद्धा आवयोरेकरूपयोः।
कुम्भीपाकेषु पच्यन्ते नराः कल्पसहस्रकम्।। पातालखण्डः,अ.46.20,21

❖



# वेदेषु भक्तितत्त्वम्

डॉ. देवेन्द्र कुमार शर्मा

भारतभूमिर्भक्तिरसस्य स्निग्धया धारया सिक्ता आप्यायिता च विद्यते। भारतभूमौ भक्तेरुद्गमः कदाऽभूत् कियता कालेन वर्तते भक्तिरसस्य प्रवाहोऽस्मिन् देशे इति प्रश्ने विसंवादो वर्तते विपश्चिताम्, किन्तु पद्मपुराणस्थे भागवतमाहात्म्ये दृश्यते यद्–

**उत्पन्ना द्रविडे साहं वृद्धिं कर्णाटके गता।**
**क्वचित्क्वचिन्महाराष्ट्रे गुर्जरे जीर्णताङ्गता।।**[1]

एतेन सिध्यति यद् भक्तेः उद्गमः द्रविडदेशे एव' महाराष्ट्रे तु भक्तिरसाप्लाविताः अनेके कवयः सन्तः महापुरुषाः बभूवुः। अधुनाऽपि तत्र भक्तिरसाप्लावितः नारदीयसंप्रदायः बारकरीसंप्रदायः च वर्तते, तदनुगा नित्यं विट्ठल-विट्ठल इति संकीर्तनेन महाराष्ट्रभूमिं पावयन्ति।

प्राच्यविद्याविदां पाश्चात्त्यविदुषां च मतानुसारेण भारतभूमौ भक्तेः प्रवाहः "ईसाई" धर्मस्य प्रभावतः सञ्जातः। पाश्चात्त्यधर्मेषु यहुदिधर्मः कर्मप्रधानः, ईसाईधर्मश्च भक्तिरसाप्लावित इति सुनिश्चितमस्ति। ईसाईधर्मे भक्तेः प्रभुत्वं भगवति निश्चला भक्तिश्च प्रधानरूपेण वर्तते। तेषां विपश्चितां मतानुसारं तेषामेव सम्पर्कतो भक्तिः भारतभूमावपि प्रविश्य सर्वत्र प्रसृता अनुमता च जनैः। परन्तु गूढदृष्ट्या यदा विचार्यते तदा एषा विचारसरणिर्दुष्टा निस्सारा च प्रतिभाति।

वैदिकवाङ्मयस्यावलोकनात् स्फुटीभवतीदं न्नन केवलं वेदाः कर्मप्रचारकाः अपितु त एव भक्तेरप्युद्भूतिस्थानम्। यदा वयं प्राचीनसाहित्ये धर्मविवेचनं पश्यामः तदा दृश्यते यत् कालविशेषे कस्यचित् सिद्धान्तस्य विवेच्यविषयः तु वर्तते, किन्तु तस्य सिद्धान्तस्य स्पष्टरूपेणाभिधानं न वर्तते। प्रत्यक्षाभिधानस्याभावे तस्य विषयवस्तुन उपेक्षा भवति।

किन्त्वेषोपेक्षा असङ्गता। इदं सत्यं यत् संहितासु ब्राह्मणग्रन्थेषु चानुरक्तिसूचकस्य भक्तिशब्दस्यासद्भावो वर्तते, किन्तु भक्तेर्विषयास्तु पर्याप्तरूपेणोपलभ्यन्ते तत्र। अत इदं कल्पनं यद् भक्तेस्तत्काले विकास एव नासीदिति सुतारामनुचितम्। संहितासु ब्राह्मणग्रन्थेषु च कर्मकाण्डविषया बाहुल्येन वर्त्तन्ते किन्तु तत्र भक्तेरपि स्फुटाभासो वर्तत एव। मन्त्रेषु देवानां स्तुतिरतीव मार्मिकरूपेण कृता वर्तते। स्तुतीनां दर्शनेन स्तोतॄणां हृदयेऽनुरागस्याभाव आसीदिति मतमुपाहासास्पदमेव प्रतीयते। मम मते तु हृदये भक्तेरभावे एतादृशीनां कोमलानां भावप्रवणानाञ्च स्तुतीनामुद्गम एव भवितुं नार्हतीति। शुष्कनीरसहृदये नैतादृशी कोमलता भावुकता च सम्भाव्यते। देवानां स्तवनकाले स्तोता ऋषिस्तैः सह माता, पिता बन्धुरित्यादिं नानाप्रकारकं सम्बन्धं स्थापयति। अतः स्पष्टमेव यत् स्तोतॄणां हृदये देवान् प्रति सर्वतोभावेन प्रेमानुरागश्च वर्तते।

कासाञ्चित् स्तुतीनामुदाहरणेन एव सिद्धान्तः स्फुटीभविष्यति। यज्ञेष्वग्निः प्रधानदेवो भवति तेनैव यज्ञानां सम्पादनं भवति। यद्यपि प्रत्यक्षतया इदमनुमीयते यत् कर्मकाण्डसम्बद्धदेवस्य विषये भक्तेरभावो भविष्यति, किन्तु अवलोक्यते यत् तस्य विषयेऽपि भावप्रवणाः स्तुतयो वर्तन्ते। स तु न केवलं विपत्तिभ्यस्त्राता वर्णितः अपितु मातृ-पितृ इत्यादिरूपेणापि तस्य वर्णनं वर्तते। अधोनिर्दिष्टे ऋङ्मन्त्रेऽग्निदेवो मनुष्याणां पिता माता चेति वर्णितोऽस्ति-

**त्वां वर्धयन्ति क्षितयः पृथिव्यां त्वां शय उभयासो जनानाम्।**

**त्वां त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम्।।**[2]

य ऋषिरग्निदेवं पितृरूपेण मातृरूपेण च वर्णयति तस्य हृदये भक्तिरसस्य भावनाऽवश्यमेवासीत्।

वैदिकदेवेषु इन्द्रः शौर्यस्य प्रतीकम्। दस्यूनां दमने मनुष्यास्तस्य साहाय्यं कामयन्ते। तस्यानुकम्पया आर्याः शत्रून् विध्वंसयितुं समर्था भवन्ति। शौर्यप्रधानेन इन्द्रेण सहानुरागसम्बन्धस्याभावोऽनुमीयते, किन्तु तेन सहापि स्निग्धानुरागसम्बन्धः स्थापितो वैदिकऋषिभिः। इन्द्रस्तु न केवलं पिता अपितु माताऽपि वर्णितः-

**त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ।**

**अथाते सुम्नमीमहे।**[3]

एषु मन्त्रेषु भक्तिभावस्तु सुतरां स्फुटो वर्तते। स्वभक्तिसूत्रे शाण्डिल्यो वक्ति-



**भक्तिः प्रमेया श्रुतिभ्यः।**[4] ऋतुभ्यो भक्तेरवगमो भवति। अस्य सूत्रस्य व्याख्यायां टीकाकर्त्रा नारायणतीर्थेन भक्तेर्नवविधप्रकारस्य समर्थकानां मन्त्राणां सत्याख्यानमुद्धरणं प्रस्तुतम्। ब्राह्मणकालेऽप्युपासकानां भक्तेः स्वरूपं बद्धमूलं दृश्यते। यद्यपि ब्राह्मण-ग्रन्थेषु कर्मणः प्राधान्यम्, तथापि श्रद्धायुक्ता भक्तिरपि स्पष्टतरा दृश्यते। आरण्यकेषु बहिर्यागानामपेक्षया अन्तर्यागस्य महत्त्वं प्रदर्शितं वर्तते। अस्मिन् समये तु सोमयागस्यापि प्रचार आसीत्। साधकानां चित्तं तु भक्तिं प्रत्युन्मुखमासीत्। उपनिषदस्तु ज्ञान-निर्दर्शिकाः किन्तु तास्वपि भक्तेर्निदर्शनं प्राप्यते। कठोपनिषदि तु भक्तिभावस्य स्पष्टं वर्णनमुपलभ्यते। आत्मोपलब्धेरुपायान् दर्शयन्ती श्रुतिः कथयति-

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।**

**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्।।**[5]

अयमात्मा वेदाध्ययनेन, धारणशक्त्या, श्रवणेन चापि नोपलभ्यते। अयं साधको यमात्मानं वरयति तेनैवात्मना एष प्राप्तव्यः। तं प्रति एष आत्मा स्वां तनुं विवृणुते। भावस्त्वयं यदात्मनैवात्मोपलभ्यते। अत्र अनुग्रहस्य निर्देशो दृश्यते। अपरस्मिन् मन्त्रे तु प्रसादस्य स्पष्टनिर्देशोऽस्ति-

**तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः।**[6]

अर्थात् निष्कामः पुरुषो जगत्कर्तुः प्रसादेन स्वात्मनो महिमानं पश्यति गतमन्युश्च भवति। वैष्णवसम्प्रदाये "प्रसादस्य" अति महत्त्वं वर्तते। भगवतोऽनुग्रहेणैव भक्तस्य कामनासिद्धिर्भवति। श्रीमद्भागवत इदं "पोषणम्" इत्यभिधानेनाभिहितम्-

**स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः।**

**मन्वन्तराणि सद्धर्म ऊतयः कर्मवासना।।**[7]

अनेन कारणेन वल्लभाचार्यमतं पुष्टिमतमित्यभिहितम्। श्वेताश्वतरोपनिषदि वर्णितं यत् तप इत्यादि प्रभावातिरिक्तं देवप्रसादेनापि श्वेताश्वतर ऋषिः सिद्धिं प्राप्तवानिति-

**तपः प्रभावाद्देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान्।**

**अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम्।।**[8]

अग्रे अत्रैव भक्तेः प्रथमतया स्पष्टं प्रतिपादनं प्राप्यते-

**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।**

**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।**[9]

यस्य नरस्य देवे उत्कृष्टा भक्तिर्भवति तथा देववदेव गुरावपि भक्तिर्भवेत् तमेव महात्मानम् इमे उक्ता अर्थाः स्पष्टमवभासन्ते। उपनिषत्सु तु भक्तिशब्दस्यायं प्रथमो नामतः प्रयोगो वर्तते। परवर्तिनि साहित्ये गुरोर्यन्महत्त्वं दरीदृश्यते तस्य मूलरूपा एषा श्रुतिः। वैष्णवमते तु भक्तेरपेक्षया प्रपत्तेर्महत्त्वमधिकं वर्तते। प्रपत्तौ तु भगवान् एवोपेय उपायश्च वर्त्तते। आवश्यकता त्वेषा यद् भक्तो भगवन्तं शरणं गच्छेत्। भक्तं शरणापन्नं भगवानुद्धरति। अस्य प्रपत्तिसिद्धान्तस्य प्रतिपादनं श्वेताश्वतरोपनिषदीत्थं दृश्यते–

**यो ब्रह्माणं निदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै।**
**तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।।**[10]

अस्मिन् मन्त्रे ब्रह्मणस्तत्कारणभूतस्य वेदस्य चोत्पादकस्य भगवतः शरणं प्रापणीयमिति वर्णितम्। श्रीमद्भगवद्गीता तु वैष्णवानां सर्वश्रेष्ठो ग्रन्थः। अस्मिन् विषये गीताऽपि कठोपनिषदः श्वेताश्वतरोपनिषदश्चानुयायिनी। इत्थं दृश्यते यद् भक्तिसिद्धान्तो वैदिकः सत्यकामस्य सत्यसङ्कल्पस्य च ब्रह्मणः प्रसादेनैव साधको भौतिकक्लेशेभ्यो मुक्तो भवति।

प्राचीनटीकाकर्तॄणामपि ध्यानमत्रासीत्। महाभारतस्य प्रथितव्याख्याकर्त्रा नीलकण्ठेन मन्त्ररामायणम्, मन्त्रभागवतम् इति च यल्लिखितं तत्र वैदिकमन्त्रैर्वेदेषु रागाख्यानस्य भगवताख्यानस्य स्फुटीकरणमस्य निदर्शनम्।

श्रीमद्भागवतमहापुराणे भक्तेर्विवेचनं वैशद्येन वर्तते। नवधा भक्तेर्विवेचनं तु प्रसिद्धमेव। अयमेव निष्कर्षो यद् ज्ञानकर्मसिद्धान्तवद् भक्तिसिद्धान्तोऽपि वैदिकसंहितायां स्फुटं बीजवन्निर्दिष्टो विलसति।

❖

## सन्दर्भाः

1. पद्मपुराणम्, भागवतमाहात्म्यम्।
2. ऋ. 6.1.5
3. ऋ. 6.98.11
4. शा.भ.सू. 1.2.9
5. कठोपनिषद् 1.2.23
6. कठोपनिषद् 1.2.20
7. श्रीमद्भागवतम् 2.10.4
8. श्वेताश्वतरोपनिषद् 6.21
9. श्वेताश्वतरोपनिषद् 6.23
10. श्वेताश्वतरोपनिषद् 6.18